घुषिर् ६८३ अविशब्दने । विशब्दनं प्रतिज्ञानं ततोऽन्यस्मिन्नर्थे इत्येके । 'शब्दे' इत्यन्ये पेठुः । घोषति । जुघोष । घोषिता । इरित्वादङ् वा । अघुषत्-अघोषीत् ॥

683. √Ghushir, not to proclaim [illegible] To sound. The word aviśabdana means no-viśabdana, The word viśabdana means 'promise.' According to others the word is śabda only and the root means 'to sound'. The indicatory इर् makes the rule III. 1. 57, S. 2269 applicable in the aorist. When the root has all other meanings except that of 'proclaiming' (viśabdana) it is read here. When it has the meaning of viśabdana (proclaiming), it belongs to Churâdi class (X 187). Pre. घोषति । Per जुघोष । I Fut. घोषिता । Aorist अघुषत् or अघोषीत् । अघुषताम् । or अघोषिष्टाम् । Caus. घोषयति । Aorist अजूघुषत् । Desi. जुघुषिषति, or जुघोषिषति. Inten. जोघुष्यते । Yaṅ luk जोघोष्टि । लोट् 2nd S. जोघुड्ढि । लङ् अजोघोट् । Past Part. Pass. घुष्टः (VII. 2. 23 S. 3063). Ger. घुषित्वा or घोषित्वा । Noun घुष्टा ॥

अक्षू ६८४ व्याप्तौ ।

684. अक्षू व्याप्तौ 'to pervade.' As अक्षति । But by the following sûtra, it takes the vikaraṇa श्नु also.

२३३८ । अक्षोऽन्यतरस्याम् । ३ । १ । ७५ ॥

अक्षो वा श्नुप्रत्ययः स्यात्कर्त्रर्थे सार्वधातुके परे । पक्षे शप् । अक्ष्णोति । अक्ष्णुतः । अक्ष्णुवन्ति । अक्षति । अक्षतः । अक्षन्ति । आनक्ष । आनक्षिथ-आनष्ठ । अक्षिता-अष्टा । अक्षिष्यति । 'स्कोः' (३८०) इति कलोपः । 'षढोः कः सि' (२९५) । अक्ष्यति । अक्ष्णोतु । अक्ष्णुहि । अक्ष्णवानि । आक्ष्णोत् । आक्ष्णुवम् । अक्ष्णुयात् । अक्ष्यात् । ऊदित्त्वादिट् वा । 'नेटि' (२२६८) । मा भवान् अक्षीत् । अक्षिष्टाम् । अक्षिषुः । इडभावे तु मा भवानाक्षीत् । आष्टाम् । आक्षुः ॥

2338. The vikaraṇa श्नु is optionally employed after the root अक्ष 'to pervade.' when a sârvadhâtuka affix denoting an agent, follows.

Thus अक्ष्णोति or अक्षति 'he pervades or obtains.' D. अक्ष्णुतः । Pl, अक्ष्णुवन्ति ।

684. √Akshû, to pervade. Because the root has an indicatory long ऊ. the इट् augment is optional. Pre. अक्षति । अक्षतः । अक्षन्ति । Per. आनक्ष । आनष्ठ or आनक्षिथ । आनक्ष्व or आनक्षिव । I Fut. अक्षिता, or अष्टा । II Fut, अक्षिष्यति or अक्ष्यति (= अक्ष्+स्यति=अक्क्ष्+स्यति VIII. 2. 41 S. 295 = अक्+स्यति the क् is elided by VIII. 2. 29 S. 380 = अक्ष्यति) । Imperative अक्षतु or अक्ष्णोतु । अक्ष्णुहि । अक्ष्णवानि । Imper. आक्षत् or आक्ष्णोत् । 1. S. आक्ष्णुवम् । Pote. अक्षेत् or अक्ष्णुयात् । Bene. अक्ष्यात् । Aorist आक्षीत् (अक्षीत् without augment by VII. 2. 4 S. 2268). D. आक्षिष्टाम् । P. आक्षिषुः । When इट् is not added, we have आक्षीत् । आष्टाम् । आक्षुः । Caus. अक्षयति । Aorist आचिक्षत् । Desi. अचिक्षिषति or अचिक्षति । Past Part. Pass. अष्टः । Ger. अक्षित्वा । अष्ट्वा । Noun अक्षि: 'eye.'

तक्षू ६८५, त्वक्ष ६८६ तनूकरणे ।

685. तक्षू तनूकरणे 'to make thin.' As तक्षति । This root also take श्नु optionally by the following sûtra.

२३३९ । तनूकरणे तक्षः । ३ । १ । ७६ ॥

श्नुः स्याच्छब्विषये । तक्ष्णोति-तक्षति वा काष्ठम् । ततक्षिथ-ततष्ठ । अतक्षीत् । अतक्षिष्टाम्

अतक्षत् । अताक्षीत् । 'तनूकरणे' किम् । वाग्भिः संतक्षति । भर्त्सयतीत्यर्थः ।

2339. The affix श्नु is optionally employed after the root तक्ष 'to make thin' when a sârvadhâtuka affix denoting an agent, follows.

Thus तक्ष्णोति or तक्षति काष्ठं 'he planes the wood.' Why do we say 'when meaning to make thin'? Observe, वाग्भिः संतक्षति । 'he cuts with speech.'

685. √Takshâ, to make thin. Pre. तक्षति or तक्ष्णोति । Per. ततक्ष । ततक्षिथ or ततष्ठ । Aorist अतक्षीत् or अताक्षीत् । अतक्षिष्टाम् or अताष्टाम् । Noun तष्टा ॥

686. √Tvakshâ, Pre. त्वक्षति । Per. तत्वक्ष । I Fut. त्वक्षिता ॥

उक्ष ६८७ सेचने । उक्षां चकार ॥

687. √Uksha, to sprinkle. Pre. उक्षति । Per. उक्षां चकार । I Fut. उक्षिता । Nouns :—महोक्ष. वैशवक्रम् । जातोक्षः । वृद्धोक्षः ॥

रक्ष ६८८ पालने ।

688. √Raksha, to protect. Pre. रक्षति । Per. ररक्ष । I Fut. रक्षिता । Nouns रक्षणं, राक्षसः । रक्षः । निरक्षो ॥

णिक्ष ६८९ चुम्बने । प्रणिक्षति ॥

689. √ṇiksha, to kiss. Pre. निक्षति । With प्र we have प्रणिक्षति invariably by VIII. 4. 14. S. 2287. But in Kridanta we have प्रणिक्षणम् or प्रनिक्षणम् by VIII. 4. 33. S. 2839). Per. निनिक्ष । I Fut. निक्षिता ॥

तृक्ष ६९०, स्तृक्ष ६९१, णक्ष ६९२, गतौ । तृक्षति । स्तृक्षति । नक्षति ॥

690. √Triksha, 691 √Striksha, 692 √ṇaksha, to go, to move. Pre. तृक्षति । Per. ततृक्ष । I Fut. तृक्षिता । Caus. तृक्षयति, Aorist अततृक्षत् । Desi. तितृक्षिषति । तरीतृक्ष्यते । Yaṅ luk. तरीतृक्षि । Nouns तार्क्ष्यः । तृक्षः Name of Kâśyapa.

691. √Striksha, Pre. स्तृक्षति । Per. तस्तृक्ष । I Fut. स्तृक्षिता । Inten, तरीस्तृक्ष्यते ॥

692. √ṇaksha, to go, to move. Pre. नक्षति । प्रणक्षति । Per. ननक्ष । I Fut. नक्षिता । Noun नक्षत्रम् ॥

वक्ष ६९३ रोषे । संघाते इत्येके ।

693. √Vaksha, to be angry. Some say it means 'to accumulate'. Pre. वक्षति । Per. ववक्ष । I Fut. वक्षिता । Noun वक्षः ॥

मृक्ष ६९४ संघाते । म्रक्ष इत्येके ।

694. √Mriksha, to accumulate. Some say the root is म्रक्ष । Pre. मृक्षति । or म्रक्षति । Per. ममृक्ष or मम्रक्ष । I Fut. मृक्षिता or म्रक्षिता । Noun म्रक्षिता ॥

तक्ष ६९५ त्वचने । त्वचनं संवरणं त्वचो ग्रहणं च ॥

695. √Taksha, to cover. The tvachana means 'to cover,' and also 'to appropriate.' Some read it as √paksha with the meaning to accept. The root तक्षू meaning 'to make thin' has already been taught before. Pre. तक्षति । Per ततक्ष । I Fut. तक्षिता । See no 685.

पक्ष ६९६ परिग्रहे इत्येके ।

696. √Paksha, to accept. Pre. पक्षति । Per. पपक्ष । I Fut. पक्षिता । Noun पक्षः ॥

शूर्क्ष ६९७ आदरे । शुशूर्क्ष । 'अनादरे' इति तु क्वाचित्कोऽपपाठः । 'अवज्ञावहेलनमसूर्क्षणम्' इत्यमरः ॥

697. √Shûrksha, to respect. 'To disregard' according to some. But this is wrong. See Amarakosha where the author gives the meaning of the word असूर्क्षणम् as 'disregard' and 'dishonor', (I, 7, 23 verse). Pre. शूर्क्षति ॥

काक्षि ६९८, वाक्षि ६९९, माक्षि ७०० काङ्क्षायाम् ।

698. √Kâkshi, 699 √Vâkshi, 700 √Mâkshi, to desire, to wish for. Pre. काङ्क्षति । Per. चकाङ्क्ष । I Fut. काङ्क्षिता । Caus. काङ्क्षयति, Aorist अचकाङ्क्षत । Desi. चिकाङ्क्षिषति । Inten चाकाङ्क्ष्यते । Yan luk चाकांक्षि ॥

699. √Vâkshi, Pre. वाङ्क्षति ॥

700. √Mâkshi, Pre. माङ्क्षति ॥

द्राक्षि ७०१, ध्राक्षि ७०२, ध्वाक्षि ७०३ घोरवासिते च ।

701. √Drâkshi, 702. √ Dhrâkshi, 703 √Dhvâkshi, to make a discordant sound. By force of च, it means 'to desire' also. Pre, द्राङ्क्षति । Noun द्राक्षा ॥

702. √Dhrâkshi, Pre. ध्राङ्क्षति । Noun ध्राक्षा ॥

703. √Dhvâkshi, to crow, to caw, 2. To desire. Pre. ध्वाङ्क्षति । Per. दध्वाङ्क्ष । I Fut. ध्वाङ्क्षिता । Noun. तीर्थध्वांक्षः (II. 1. 42. S. 719). ध्वाक्षाणाम् । (VII. 2. 9. S. 1897).

चूष ७०४ पाने । चुचूष ॥

704. √Chûsha, to drink, to suck. Pre. चूषति । Per. चुचूष । I Fut. चूषिता । Caus. चूषयति । Aor. अचूचुषत् । Desi. चुचूषिषति । Inten. चोचूष्यते । Yan luk चोचूष्टि ।

तूष ७०५ तुष्टौ ।

705. √Tûsha, to be satisfied, to satisfy. Pre. तूषति ॥

पूष ७०६ वृद्धौ ।

706. √Pûsha. to nourish, to increase, to grow. Note. This root belongs to Divâdi and Kryâdi classes also. Pre. पूषति । Nouns. पूषा 'Sun.' (Un. I. 156). पूषी a niche for placing the lamp'.

मूष ७०७ स्तेये ।

707. √Mûsha, to steal, rob, plunder. Note. मुष with short उ belongs to Kryâdi class. Pre. मूषति । Nouns. मूषकः 'mouse thief.' मूषिका ॥

लूष ७०८, रूष ७०९ भूषायाम् ।

708. √Lûsha, to adorn, decorate. Pre. लूषति ॥

709. √Rûsha, to adorn, Pre. रूषति ॥

शूष ७१० प्रसवे । प्रसवोऽभ्यनुज्ञानम् । तालव्योष्मादिः ॥

710. √Śûsha, (to produce, beget). The word prasava means permission. Therefore the root means 'to permit.' The root begins with the palatal sibilant and not with the dental sibilant as some wrongly read it. Pre. शूषति ॥

यूष ७११ हिंसायाम् । जूष च ।

711 A. √Jûsha cha, to injure. This root is found in the Churâdi also. Pre. जूषति ।

711 √Yûsha, to injure. Some read the root as जूष । It is conjugated similary to जूषति । Per. जुजूष । Noun यूष 'soup : broth.' So also यूषम् ।

भूष ७१२, तसि ७१३ अलंकारे । भूषति ॥

712. √Bhûsha, to adorn. *It is* found in the Churâdi class also. Pre. भूषति ॥

713. √Tasi, to adorn. It is not found in the Siddhânta or the Mâdhavîya. Pre. तंसति ॥

ऊष ७१४ रुजायाम् । ऊषां चकार ॥

714. √ûsha, to be ill, Pre. ऊषति । Per. ऊषांचकार । Caus. ऊषयति । Aorist without augment ऊषिषत् as मामवानूषिषत् । Desi. ऊषिषिषति । Nouns :—ऊषः 'Salt ground' ऊषरः 'a saline soil.'

ईष ७१५ उञ्छे ।

715. √isha, to glean. Pre. ईषति । Per. ईषांचकार । I Fut. ईषिता । Aorist ऐषीत् । Nouns. ईषा 'the pole or shaft of a carriage or a plough'.

कष ७१६, खष ७१७, शिष ७१८, जष ७१९, झष ७२०, शष ७२१, वष ७२२, मष ७२३, रुष ७२४, रिष ७२५, हिंसार्थाः । तृतीयषष्ठौ तालव्योष्मादी । सप्तमो दन्त्योष्ठ्यादिः । चकाष । चखाष । शिशेष । शिशेषिथ । शेष्टा । कृषः । अशिषत् । अशेक्ष्यत् । जेषतुः । जझषतुः । शेषतुः । ववषतुः । मेषतुः ॥

716. √Kasha 717 √Khasha, 718 √Śisha. 719 √Jasha, 720 √Jhasha, 721 √Śasha, 722 √Vasha, 723 √Masha, 724 √Rusha, 725 √Risha. To injure, to kill. The third (no 718) and the sixth (No. 721) begin with a Palatal sibilant. The seventh (No. 722) begins with a dento-labial. Pre. कषति Per. चकाष । I Fut. कषिता । Aorist अकाषीत् or अकषीत् । Past Part. Pass. कषितः or कष्टम् । Nouns [illegible]ः । स्वकषः or °कषः । [illegible] कषम् । कषायिन् (III. 2. 143. S. 3123).

717. √Khasha, to injure. Pre. खषति । Per. चखाष । Nouns खष्यः 'anger violence'. (Un III. 28).

718. √Śisha, to injure. Pre. शेषति । Per. शिशेष । शिशेषिथ । I Fut. शेष्टा । II Fut. शेक्ष्यति । Imperative शेषतु । Imper. अशेषत् । Pote. शेषेत् । Bene. शिष्यात् । Aorist अशिक्षत् (with क्स III. 1. 45 S. 2336). Or अशेषीत् । Condi. अशेक्ष्यत् । Caus शेषयति । Aorist अशीशिषत् । Desi. शिशिक्षति । Inten. शेशिष्यते । Yañ luk. शेशेष्टि । Past Part. Pass, शिष्टः । Past Part Act. शिष्टवान् । Ger, शिष्ट्वा । Nouns शिष्यः अशिषोरः ॥

719. √Jasha, to injure. Pre जषति । । Per. जजाष । जेषतुः । I Fut. जषिता । Imperative जषतु ॥

720. √Jhasha, to injure. Pre. झषति । Per. जझाष । जझषतुः ॥

721. √Śasha, to injure. Pre. शषति । Per. शशाष । शेषतुः । Noun. शष्पः ॥

722. √Vasha, to injure. Per. वषति । Per. ववाष. ववषतुः । ववषुः । I Fut. वषिता ॥

723. √Masha, to injure Pre. मषति Per. ममाष । मेषतुः ॥

724. √Rusha, to injure, Pre. रोषति । Per. रुरोष । रुरोषिथ । I Fut. रोषिता or रोष्टा । In forming the First Future the augment इट् is optional by the following sûtra. II Fut. रोषिष्यति । Past. Part. Pass. रोषितम् । रुषितम् or रुष्टः । Ger. रुषित्वा

२३४० । तीषसहलुभरुषरिषः ७ । २ । ४८ ॥

इच्छत्यादेः परस्य तादेरार्धधातुकस्येड्वा स्यात् । रेषिता—रेष्टा । रेषिष्यति । रेषिता—रेष्टा । रेषिष्यति ॥

2340. An ârdhadhâtuka affix beginning with a त may optionally take the इट्, after the roots इष्, सह्, लुभ्, रुष्, and रिष् ॥

Therefore we have in the First Future two forms रेषिता or रेष्टा ॥

725. √Risha, to injure. Some read the root रुष along with these roots. The Mâdhavîya does not approve it. Pre. रेषति । Per. रिरेष । I Fut. रेषिता, or रेष्टा । Past. Part. Pass. रिष्टः ॥

भष ७२६ भर्त्सने । इह भर्त्सनं श्वरवः । भषति । बभाष ॥

726 √Bhasha, (to abuse, reproach) 2. To bark. The word bhartsana here means the 'sound of a dog.' The root therefore means 'to bark, growl' Pre. भषति । Per. बभाष । Noun. भषकः ॥

उष ७२७ दाहे । ओषति ॥

727 √Usha, to burn. Pre. ओषति । In forming the Perfect, the following sûtra allows an option: Per. ओषांचकार । उवोष । ऊषतुः । उवोषिथ । I Fut. ओषिता । II Fut. ओषिष्यति । Imperative ओषतु । Imper. औषत् । Pote. ओषेत् । Bene उष्यात् । Aorist. औषीत् । Caus. ओषयति, Aorist औषिषत् (without augment.) Desi. ओषिषिषति । Nouns: उष्मा । उष्मः । उष्णिका 'gruel.' उष्णोष्ठः । ओष्ठः 'lips' बिम्बोष्ठी । उष्ट्रः camel.

२३४१ । उषविदजागृभ्योऽन्यतरस्याम् । ३ । १ । ३८ ॥

एभ्यो लिट्याम्वा स्यात् । ओषांचकार - उवोष । ऊषतुः । उवोषिथ ॥

2341. The affix आम् is optionally employed after these roots, viz:—उष् 'to burn,' विद् 'to know,' and जागृ 'to wake,' when लिट् follows.

Thus ओषांचकार or उवोष । So also विदांचकार or विवेद, जागरांचकार or जजागार । As there is an agreement in the present instance to regard the verb विद् as ending in a short अ, *guna* is not substituted, as it would otherwise have been, by rule VII. 3. 86.

जिषु ७२८, विषु ७२९, मिषु ७३०, णिषु ७३१, सेचने । जिजेष । क्रादिनियमादिट् । जिजेषिथ । जिजेषिव । जेष्टा । जेष्यति । अजेषत् ॥

728. √Jishu, 729 √Vishu, 730 √Mishu, 731 √nishu to sprinkle. Pre. जेषति । Per. जिजेष । I Fut. जेषिता । Caus. जेषयति, Aor. अजीजिषत् । Desi. जिजिषिषति । जिजेषिषति । Inten. जेजिष्यते । Yaṅ luk जेजेष्टि । Past. Part. Pass. जिष्टम् । Ger. जेषित्वा । जिषित्वा (I. 2. 26) जिष्ट्वा (VII. 3. 56).

729. √Vishu, to sprinkle. The root विष्लृ व्याप्तौ belongs to the Juhotyâdi class: and विष विप्रयोगे to Kryâdi class. Pre. वेषति । Per. विवेष । विविषतुः । विविषुः । विवेषिथ । विविषिव । I Fut. वेष्टा । II Fut. वेक्ष्यति । Aorist. अविक्षत् (III. 1, 45). Desi. विविक्षति (I. 2. 10). Past. Part. Pass. विष्टम् । Ger. विषित्वा । वेषित्वा । विष्ट्वा । Adj. वैष्यम् (V. 1. 100).

NOTE:—Though it is given in the list of anit roots, yet it takes इट् in the Perfect by VII. 2. 13.

√730. Mishu, to sprinkle. When it means 'to emulate,' it belongs to Tudâdi class. Pre. मेषति । Per. मिमेष । I Fut. मेषिता । Nouns. मेषः । मेषी । Past. Part. Pass. मिषष्टः । Aor. मिषष्टवान् । Ger. मिषित्वा or मेषित्वा ॥

731. √ushu, to sprinkle. (Not given by Bhattoji). Pre. ओषति ॥

पुष ७३२ पुष्टौ । पोषति । पोषिता । पोषिष्यति । अपोषीत् । अनिट्केषु पुष्य इति श्यना निर्देशादयं सेट् । अतो न क्सः । अङ्विधौ दैवादिकस्य ग्रहणात्राङ् ॥

732. √Pusha, to nourish. Per. पोषति । Per. पुपोष । पुपोषिथ । I Fut. पोषिता । II Fut. पोषिष्यति । Aorist. अपोषीत् । This root is सेट्; for the पुष् which is anit belongs to Divâdi class, as it is exhibited in the Anit list as पुष्यति । Therefore the aorist is not formed by क्स । Nor is the aorist formed by अङ् under III. 1. 55, for that पुष् is also of the Divâdi class. Past. Part. Pass. पुषितः । पोषितः । पुष्टम् ॥

श्रिषु ७३३, श्लिषु ७३४, प्रुषु ७३५ प्लुष ७३६, दाहे । श्रेषति । शिश्रेष । श्रेषिता । श्लेषति । शिश्लेष । श्लेषिता । अयमपि सेट् । अनिट्सु दैवादिकस्यैव ग्रहणम् । इति कैयटादयः । यत्त्वनिट्कारिकान्यासे द्वयोर्ग्रहणमित्युक्तं तत्स्वोक्तिविरोधात्ग्रन्थान्तरविरोधाच्चोपेक्ष्यम् । पुप्रोष । पुप्लोष ॥

733. √Śrishu, 734 √Ślishu, 735, √Prushu, 736 √Plushu, to burn. Pre. श्रेषति । Per. शिश्रेष । I Fut. श्रेषिता ॥

734. √Ślishu, to burn. This root is also सेट् । The root ślish read in the Anit list in Divâdi according to Kaiyaṭa and others. The opinion of the author of Anit Kârikânyâsa is that both roots are anit. That is however wrong, as it is against his former opinion, and against other books. See III. 1. 46 and comments on it by Kaiyaṭa and Haradatta. Pre. श्लेषति । Per. शिश्लेष । शिश्लेषिथ । I Fut. श्लेषिता । Past. Part. Pass. श्लिष्टः । Nouns, श्लेष्मकः । श्लेष्मलः । श्लेषः ॥

735. √Prushu, to burn. Pre. प्रोषति । Per. पुप्रोष ॥

736. √Plushu, to burn Pre. प्लोषति । Per. पुप्लोष ॥

पृषु ७३७, वृषु ७३८, मृषु ७३९ सेचने । मृषु सहने च । इतरौ हिंसासंक्लेशनयोश्च । पर्षति । पपर्ष । पृष्यात् ॥

737. √Prishu, 738 √Vrishu, 739 √Mrishu, to sprinkle. The root मृषु means 'to endure' also. The other two (prish and vrish) mean 'to hurt,' and 'to vex' also. According to Kâśyapa they mean 'to give' also. Pre. पर्षति । Per. पपर्ष । I Fut. पर्षिता । II Fut. पर्षिष्यति । Imperative. पर्षतु । Imper. अपर्षत् । Pote. पर्षेत् । Bene. पृष्यात् । Aorist अपर्षीत् । Condi. अपर्षिष्यत् । Caus. पर्षयति, Aor. अपपर्षत् or अपीपृषत् । Desi. पिपर्षिषति । Inten. परीपृष्यते । Past. Part. Pass. पृष्टम् । पर्षितम् । Ger. पर्षित्वा । पृष्ट्वा । Nouns. पार्षिः । पार्षितः ॥

737. √Prishu, yaṅ luk conjugation. Pre. पर्पृषीति or पर्पर्ष्टि । पर्पर्ष्टि । Imperative पर्पृष्टि । पर्पृषाणि । Imper. अपर्पट् । अपर्पट् । Aorist. अपर्पर्षीत् ॥

738. √Vrishu, to sprinkle. Pre. वर्षति । Per. ववर्ष । Nouns. वर्षः । वृषिः । वृषभः । वृषकः । वृषलः । वृषिकः ॥

739. √Mrishu, to sprinkle. Per. मर्षति । Pre. ममर्ष । Ger. मृषित्वा । मर्षित्वा । मृष्ट्वा ॥

घृषु ७४० संघर्षे ।

740. √Ghrishu, to rub Pre. घर्षति । Per. जघर्ष । I Fut. घर्षिता । Noun. घृष्टम्

हृषु ७४१ अलीके ।

741. √Hrishu, to tell a lie, to become erect, to bristle, to be delighted. As हृष्टानि or हृषितानि लोमानि 'the hair bristling up with delight.' Pre. हर्षति । Nouns. हर्षुकः । हर्षियुः ॥

तुस ७४२, ह्रस ७४३, ह्लस ७४४, रस ७४५ शब्दे । तुतोस । जह्रास । जह्लास । ररास ॥

742. √Tusa, 743. √Hrasa, 744. √Hlasa, 745. √Rasa, to sound. Pre. तोसति । Per. तुतोस । 1 Fut. तोसिता । II Fut. तोसिष्यति । Imperative तोसतु । Imper. अतोसत् । Poten. तोसेत् । Bene. तुस्यात् । Aorist. अतोसीत् । Caus. तोसयति । Aorist अतूतुसत् । Desi. तुतुसिषति । तुतोसिषति । Inten. तोतुस्यते Yan luk. तोतोस्ति । Imperative 2nd S. तोतुधि । (VIII. 2. 25). Imper. 2nd or 3rd. S. अतोतोद् (VIII. 2. 73) or 2. S. अतोतोः । Ger. तुसित्वा or तोसित्वा (I. 2. 26).

743. √Hrasa, Pre. ह्रसति । Per. जह्रास । I Fut. ह्रसिता । Desi. जिह्रसिषति Inten. जाह्रस्यते । Yañ luk. जाह्रस्ति ॥

744. √Hlasa, Pre. ह्लसति । Per. जह्लास । I Fut. ह्लसिता ॥

745. √Rasa, to make sound. The root रस meaning 'to taste' belongs to Churâdi class. Pre. रसति । Per. ररास ॥

लस ७४६ श्लेषणक्रीडनयोः ।

746. √Lasa, to embrace, to play. This root belongs also to the Churadi (189) Pre. लसति । Nouns लालस्यम् । लसकः । लसः । विलासिन् (III. 2. 143).

घस्लृ ७४७ अदने । अयं न सार्वत्रिकः । लिट्यन्यतरस्याम् (२४२४) इत्यादेर्घसादेशविधानात् । ततश्च यत्र लिङ्गं वचनं वास्ति तत्रैवास्य प्रयोगः । भ्वादौ पाठः शपि परस्मैपदे लिङ्गम् । लृदित्करणमङि । अनिट्कारिकासु पाठो वलादावार्धधातुके । क्मरचि तु विशिष्योपादानम् । घसति । घस्ता ॥

747. √Ghaslṛi, to eat. This root is defective and is not conjugated in all tenses and moods. Because it is ordained as the substitute of अद in the Perfect (see II. 4. 40). Had it been an independent root, perfect in all its conjugation, there would have been no necessity of that sûtra. Therefore this root घस् is used in those tenses and moods only where it is either specifically ordained or where its presence may be deduced. Its being read in the Bhvâdi class shows that it is conjugated as a Bhvâdi root, and not as an Adâdi root though a substitute of अद । Moreover it is Parasmaipadi. The indicatory लृ shows that the Aorist is formed with अङ् । This root is read in the list of the Anit. roots (see p 73) : in order that no इट् augment is to be added in Ardhadhâtuka affixes beginning with a वल् consonant. Thus by III. 2. 160 it takes the affix क्मरच् ; but no augment is added before this affix. As घस्मरः । Pre. घसति । Per. जघास । I Fut. घस्ता । In forming the 2nd Future the following sûtra 2342 applies :—II Fut. घत्स्यति । (VII. 4. 49) Imperative . घसतु । Imper. अघसत् । Poten. घसेत् । The root is not found in the Benedictive. The Aorist is formed by the following sûtra 2343. Aorist अघसत् । Nouns घस्मरः । घासः । घासिः ॥

२३४२ । सः स्यार्द्धधातुके । ७ । ४ । ४९ ॥

सस्य तः स्यात्सादावार्धधातुके । घत्स्यति । घस्तु । अघसत् । घसेत् । सिजाद्यभावात् सिच्या प्रयोगः ॥

2342. त् is substituted for the final स् of a root before an Ardha-dhâtuka affix beginning with स ॥

As घस् + स्यति = घत् + स्यति = घत्स्यति । Why do we say 'when ending in स्'? Observe वक्ष्यति ॥ Why do we say 'beginning with स'? Observe घासः, वासः ॥ Why an ârdhadhâtuka ? Observe आस्से, वस्से, from आस् 'to sit' and वस्, to cover'; both Adâdi roots.

२३४३ पुषादिद्युताद्यॢदितः परस्मैपदेषु । ३ । १ । ५५ ॥

श्यन्विकरणपुषादेर्द्युतादेॢदितश्च परस्य च्लेरङ् स्यात्परस्मैपदेषु । अघसत् ॥

2343. अङ् is the substitute of च्लि, after the verbs पुष 'to nourish' and the rest, द्युत 'to shine', and the rest, and the verbs having an inidcatory ॡ, when the affixes of the Parasmaipada follow.

Thus अघसत् । The verbs classed as पुषादि, are a sub-division of the 4th conjugational verbs; and द्युतादि verbs belong to the 1st conjugation. As पुष अपुषत् 'he nourished'; द्युत्, अद्युतत् 'he shone'; गम्ॢ, अगमत् 'he went'. But not so in the Atmanepada; as अद्योतिष्ट, अलोतिष्ट.

जर्ज ७४८, चर्च ७४९, झर्झ ७५० परिभाषणहिंसातर्जनेषु ।

748. √Jarja, 749 √Charcha, 750 √Jharjha, to say, 2, to injure, 3, to threaten.

The roots चर्च and झर्झ belong to the Tudâdi class also, and give rise to the same forms. The difference is in the accent only. 'चर्च to study' is Churâdi. Pre. जर्जति ॥

749. √Charcha, Pre. चर्चति ॥

750. √Jharjha, Pre. झर्झति । Noun. झर्झरः ॥

पिसृ ७५१, पेसृ ७५२, विसृ ७५३, वेसृ ७५४, पिशृ ७५५, पेशृ ७५६ गतौ । पिपिसतुः । पिपेसतुः ॥

751. √Pisṛi, 752 √Pesṛi, to go, to move. The root पिस would become पेस by guṇa; the reading two roots separately is for the sake of कित् affixes, such a those of Perfect. Pre. पेसति । Per. पिपेस । पिपिसतुः । Caus. पेसयति, Aor. अपिपेसत् । the Inten. पेपिस्यते । Nouns :—पेस्वरः । (III. 2. 175.)

752. √Pesṛi, Pre. पेसति । Per. पिपेस । पिपेसतुः । Inten. पेपेस्यते ॥

753. √Visṛi, to go. Pre. वेसति । Per. विवेस । विविसतुः । Inten. वेविस्यते ॥

754. √Vesṛi, to go. Pre. वेसति । Per. विवेस । विवेसतुः ॥

755. √Piśṛi, to go, to move. Pre. पेशति । Per. पिपेश । पिपिशतुः । Inten. पेपिश्यते ।

756. √Peśṛi, to go, Pre. पेशति । Per. पिपेश । पिपेशतुः । Inten. पेपेश्यते ॥

हसे ७५७ हसने । एदित्त्वान्न वृद्धिः । अहसीत् ॥

757. √Hase, to laugh. Pre. हसति । Per. जहास । I Fut. हसिता । Aorist. अहसीत् । (There is no Vṛiddhi, as the root has got an indicatory ए । VII. 2. 5.) Nouns :—हसः ; हासः । हासितः । हसतः । हसी । हासितकम् । हसम् ॥

णिश ७५८ समाधौ । तालव्योष्मान्तः । प्रणेशति ॥

758. √Niśa, to meditate. This root begins with a dental न and ends with a sibilant of the palatal class. Pre. नेशति or प्रणेशति । Per. निनेश । I Fut. नेशिता । Caus. नेशयति, Aorist अनीनिशत् । Desi. निनिशिषति, or निनेशिषति । Inten. नेनिश्यते । Yaṅ luk. नेनेष्टि । Ger. निशित्वा । नेशित्वा । Nouns. निशा । नेशम् ॥

मिश ७५९, मश ७६० शब्दे रोषकृते च । तालव्योष्मान्तौ ॥

759. √Miśa, 760 √Maśa, to make a sound or noise, 2. to be angry. These two roots end in a palatal sibilant. Pre. मेशति । Per. मिमेश । I Fut. मेशिता ॥

760 √Maśa, Pre. मशति । Per. ममाश । I Fut. मशिता ॥

शव ७६१ गतौ । दन्त्योष्ठ्यान्तस्तालव्योष्मादिः । शवति । अशवीत्–अशावीत्

761. √Śava, to go, approach. This root begins with a palatal Sibilant and ends with a dentolabial व । Pre. शवति । Per. शशाव । I Fut. शविता । Nouns. शवम् । शैः ॥

शश ७६२ प्लुतगतौ । तालव्योष्माद्यन्तः । शशाश । शेशतुः । शेशुः । शेशिथ ॥

762. √Śaśa, to leap, bound, jump. The root ends in the palatal sibilant. Pre. शशति । Per. शशाश । शेशतुः । शेशुः । शेशिथ । I Fut. शशिता । Nouns. शशः शशनः ॥

762 A. √Kaśa, or √Kasha, to go. Some read this root here. But it belongs to Adâdi class properly. Pre. कशति । Per. चकाश ॥

शसु ७६३ हिंसायाम् । दन्त्योष्मान्तः । न शसदद–(२२६३) इत्येत्वं न । शशसतुः । शशसुः । शशसिथ ॥

763. √Śasu, to injure, kill. This root ends in a dental sibilant. Pre. शसति । Per. शशास । शशसतुः । शशसुः । शशसिथ । There is no ए nor elision of the reduplicate, because of the prohibition of VI. 4. 126. S. 2263. Noun. शस्त्रम् । Ger. शसित्वा or शस्त्वा ॥

शंसु ७६४ स्तुतौ । अयं दुर्गतावपीति दुर्गः । नृशंसो घातुकः क्रूरः' इत्यमरः । शशंस । आशिषि नलोपः । शस्यात् ॥

764. √Śaṃsu, to praise. Durga says 'the root means misfortune also. Pre. शंसति । Per. शशंस । I Fut. शंसिता । Bene. शस्यात् । The nasal is elided by VI 4. 24. Caus. शंसयति । Aor. अशशंसत् । Desi. शिशंसिषति । Inten. शाशस्यते । Yaṅ luk शाशंसीति । The nasal is not elided. Dual शाशस्तः । Here the nasal is dropped. Imperative 2nd Per. S. शाशद्धि । Past Part. Pass. शस्तम् । Past Part. Act. शंसितवान् । Ger. शंसित्वा or शस्त्वा । Nouns नृशंसः 'cruel.' नराशंसः । शस्त्रम् ॥

चह ७६५ परिकल्कने । कल्कनं शाठ्यम् । अचहीत् ॥

765. √Chaha, to cheat, deceive. The word parikalkana means duplicity. Pre. चहति । Per. चचाह । चेहतुः । I Fut. चहिता । Aorist अचहीत् । Desi. चिचहिषति । Inten. चाचह्यते । Yaṅ luk. चाचढि । The ह is changed to ढ by VIII. 2. 31, then applies VIII. 2. 40, then 4. 41, and VIII. 3. 13.

महँ ७६६ पूजायाम् । अमहीत् ॥

766. √Maha, to honor, respect. Pre. महति । Per. ममाह । Aorist अमहीत् । Nouns महाजातीयाः, महिषः, महिमा, महिमान् देवः, माहिषम् । महान् । महती ॥-

रह ७६७ त्यागे ।

767. √Raha, to quit, abandon. Pre. रहति । Per. रराह । I Fut. रहिता । Nouns. रहः । रहसी । रहस्यम् । राहुः । अवरहम् । समरहम् ॥

रहि ७६८ गतौ । रंहति । ररंह ॥

768. √Rahi, to move with speed, hasten. Pre. रंहति । Per. ररंह । I Fut. रंहिता । Noun रंहः ॥

दृह ७६९, दृहि ७७०, बृह ७७१, बृहि ७७२ वृद्धौ । दर्हति । ददर्ह । ददृहतुः । दृंहति । बर्हति । बृंहति । बृहि शब्दे च । बृंहितं करिगर्जितम् इत्यमरः । बृहिर् इत्येके । अबृहत्—अबर्हीत् ॥

769. √Driha, 770 √Drihi, 771 √Briha, 772 √Brihi, to grow, increase. The root बृहि (772) means also 'to make sound' As बृंहितं करिगर्जितम् "the sound of an elephant'. (A. K. II. 8. 107). Some read it as बृहिर् । The aorist therefore will अबृहत् or अबर्हीत् । Pre. दर्हति । Per. ददर्ह । ददृहतुः । I Fut. दर्हिता । Caus. दर्हयति । Aor. अददर्हत् or अदीदृहत् । Desi. दिदृहिषति । Inten. दरीदृह्यते । (VII. 4. 90. S. 2644.) Yan luk दर्दृहीति or दर्दर्ढि । Past Part. Pass. दर्हितम् । Past Part. Act. दृंहितवान् । Ger. दर्हित्वा । Nouns दृढः । दृढिष्ठः ॥

770. √Drihi, Pre. दृंहति । Per. ददृंह । I Fut. दृंहिता । Desi दिदृंहिषति । Inten. दरीदृंह्यते । Yan luk दर्दृंहीति । दर्दृंढि । दर्दृंढः । Imperfect अदर्दृन् । Past Part. Pass. दृंहितम् or दृढः । Past Part. Act. दृंहितवान् । Ger. दृंहित्वा ॥

771. √Briha, Pre. बर्हति । Per. बबर्ह । I Fut. बर्हिता ॥

772. √Brihi, Pre. बृंहति । Per. बबृंह । I Fut. बृंहिता ॥

तुहिर् ७७३, दुहिर् ७७४, उहिर् ७७५ अर्दने । तोहति । तुतोह । अतुहत्—अतोहीत् । दोहति । अदुहत्—अदोहीत् । अनिट्कारिकास्वस्य दुहेर्ग्रहणं नेच्छन्ति । ओहति । उवोह । ऊहतुः । ओहिता । मा भवानुहत् । औहीत् ॥

773. √Tuhir, 774 √Duhir, 775. √Uhir, to distress, pain. Pre. तोहति । Per. तुतोह । I Fut. तोहिता । Aor. अतोहीत् or अतुहत् (III. 1. 57) Caus. तोहयति । Aor. अतूतुहत् । Desi. तुतुहिषति । तुतोहिषति । Inten. तोतुह्यते । Yan luk तोतोढि । तोतुढः । Past Part Pass. तुहितम् । Past Part. Act. तुहितवान् । Ger. तुहित्वा । तोहित्वा । (I. 2. 26).

774. √Duhir, According to Maitreya and others this root should not be included in the anit list. Pre. दोहति । Per. दुदोह । I Fut. दोहिता । Aorist अदुहत् or अदोहीत् ॥

775. √Uhir, Pre. ओहति । Per. उवोह । ऊहतुः । ऊहुः । I Fut. ओहिता । Aorist औहत् or औहीत् मा भवानुहत् । Here the aorist is formed by अङ् of इरितो वा (III. 1. 57) The other form is औहीत् ॥

अर्ह ७७६ पूजायाम् । आनर्ह ॥

776. √Arha, to honor, worship. Pre. अर्हति । Per. आनर्ह । I Fut. अर्हिता । Desi. अर्जिहिषति । Nouns कुमार्हः । दुःखार्हः ॥

Here ends this sub-section.

अथ कृपूपर्यन्ता अनुदात्तेतः ॥

The roots up to कृपू are anudâtteta.

द्युत ७७७ दीप्तौ । द्योतते ॥

777. द्युत दीप्तौ 'To shine. Pre. द्योतते । In the Perfect, the following applies.

२३४४ । द्युतिस्वाप्योः संप्रसारणम् । ७ । ४ । ६७ ॥

अनयोरभ्यासस्य संप्रसारणं स्यात् । दिद्युते । दिद्युताते । द्योतिता ॥

2344. There is vocalisation of the half-vowel of the reduplicate of द्युत् and स्वापि (Causative of स्वप्) ॥

As दिद्युते । वि दिद्योतिषते. विदिद्युतिषते, (I. 2. 26) वि देद्युत्यते ॥

In forming the aorist the following sûtra applies.

२३४५ । द्युद्भ्यो लुङि । १ । ३ । ९१ ॥

द्युतादिभ्यो लुङः परस्मैपदं वा स्यात् । पुषादित्वादङ् । अद्युतत्-अद्योतिष्ट ॥

2345. After the verbs dyut 'to shine,' and the rest the terminations of the Parasmaipada are optionally employed, when the affixes of luṅ (aorist) follow.

The Dyutâdi verbs are 22 in number (Bhuâdi 777 and twenty one that follow it up to घट 'to try.' By the the use of the word द्युद्भ्यः in the plural in the sûtra, the force is that of "and the rest" These verbs are anudâtteta and so by sûtra, I. 3. 12 they would have been invariably âtmanepadî, this aphorism makes them optionally so.

777. √Dyuta, to shine. The roots beginning with dyut and ending with Kripû are udâtta and anudâttet. Pre. द्योतते । In forming the Perfect there is vocalisation by VII. 4. 67 S. 2344. Per. दिद्युते । दिद्युताते । I Fut. द्योतिता । II Fut द्योतिष्यते । Impera. द्योतताम् । Imper. अद्योतत । Pote. द्योतेत । Bene. द्योतिषीष्ट । Aorist. अद्युतत् or अद्योतिष्ट । The root is optionally Parasmaipadi by I. 3. 91. S. 2345. When Parasmaipadi the Aorist is formed by अङ् because it belongs to पुषादि class. Caus. द्योतयति, Aor. अदिद्युतत् । Desi. दिद्युतिषते, दिद्योतिषते । Inten. देद्युत्यते । Yaṅ luk देद्युतीति or देद्योत्ति । Ger. द्युतित्वा or द्योतित्वा । Nouns. विद्युत् । दिद्युत् । ज्योतिः ॥

श्विता ७७८ वर्णे । श्वेतते । शिश्विते । अश्वितत्–अश्वेतिष्ट ॥

778. √Svitâ, to become white, be white. Pre. श्वेतते । Per. शिश्विते । I Fut. श्वेतिता । Aorist, अश्वितत् or अश्वेतिष्ट । Past. Part. Pass. श्वितम् । (VII. 2. 16) श्वितितम् (VII. 2. 17).

ञिमिदा ७७९ स्नेहने । मेदते ॥

779. √Ñimidâ, to be unctuous or greasy. This root is found in the Divâdi and the Churâdi classes also. Pre. मेदते । In forming the Perfect, the following sûtra 2346 required guṇa : but it is not so. See explanation. Per. मिमिदे । I Fut. मेदिता । Aorist. अमेदिष्ट or अमिदत् । Past. Part. Pass. मिन्न । Nouns. मेदुरः । मिन्न ॥

२३४६ । मिदेर्गुणः । ७ । ३ । ८२ ॥

मिदेरिको गुणः स्यादित्संज्ञकशकारादौ । 'शः' इति शित्त्वाभावादनेन गुणः । मिमिदे । अमिदत् - अमेदिष्ट ॥

2346. For इ in मिद् there is substituted a guṇa before such a शित् affix, where the indicatory श stands in the beginning of the affix.

NOTE:—As मेद्यति, मेद्यतः, मेद्यन्ति ॥ Why मिद् only? Observe क्लिद्यन्ति क्लिद्यन्ति। The root ञिमिदा belongs both to the Bhvâdi and the Divâdi classes The Bhvâdi मिद् will get guṇa before by शप् virtue of VII. 3. 86, but the Divâdi मिद् would not have got guṇa before श्यन्, as this affix is ङित् (I. 2. 4): hence the necessity of this sûtra. Before non शित् affixes there is no guṇa, as मिद्यते, मेमिद्यते ॥

The phrase शिति 'where the affix has an indicatory श' is understood here from the preceding Ashṭâdhyâyí sûtra VII. 3. 75. The word शित् should be explained as a Karmadhâraya compound meaning श indicatory (शश्चासौ इच्चेति)। Then शिति would mean by यस्मिन् विधि स्तदादौ and the affix that *begins* with an indicatory श। Therefore the affix श्नम् (III. 4. 81) though a शित् affix, does not *begin* with an indicatory श, and hence before this affix there will be no guṇa. Hence we have मिमिदे in the Perfect.

ञिष्विदा ७७४ स्नेहनमोचनयोः। मोहनयोः इत्येके। स्वेदते। सिष्विदे। अस्विदत्-अस्वेदिष्ट। ञिक्ष्विदा च इत्येके। अक्ष्विदत्-अक्ष्वेदिष्ट॥

780. √Ñi shvidâ, to be greasy; to be disturbed. Some give the reading as मोहनयोः। Some read here the root ञिक्ष्विदा also. Its forms in the aorist are अक्ष्विदत् or अक्ष्वेदिष्ट। Pre. स्वेदते। Per. सिष्विदे। I Fut. स्वेदिता। Aorist. अस्विदत् or अस्वेदिष्ट। Caus. स्वेदयति, Aor. असिस्विदत्। Desi. सिस्विदिषते। Inten. सेष्विद्यते। Yaṅ luk सेष्वेत्ति। Past. Part. Pass. स्विन्नः ॥

रुच ७८१ दीप्तावभिप्रीतौ च। रोचते सूर्यः। हरये रोचते भक्तिः। अरुचत्-अरोचिष्ट॥

781. √Rucha, to shine; to like, to be pleased, Pre. रोचते, as रोचते सूर्यः। हरये रोचते भक्तिः। Per. रुरुचे। I Fut. रोचिता। Aorist. अरुचत् or अरोचिष्ट। Caus. रोचयति, रोचयते, Desi. रुरुचिषते, रुरोचिषते, Ger. रोचित्वा or रुचित्वा। Nouns. रोचनम्। रोकः। रुक्म्। रोचकः॥

घुट ७८२ परिवर्तने। घोटते। जुघुटे। अघुटत्-अघोटिष्ट॥

782. √Ghuṭa, to barter, exchange. Pre. घोटते। Per. जुघुटे। I Fut. घोटिता। Aorist. अघुटत् or अघोटिष्ट। Caus. घोटयति, Aor. अजूघुटत्. Desi. जुघुटिषते। Inten. जोघुट्यते। Yaṅ luk जोघोट्टि। Past. Part. Pass. घुटितः or घोटितम्। Ger. घोटित्वा or घुटित्वा। Nouns. घुटिका। घोटकः। घोटः॥

रुट ७८३, लुट ७८४, लुठ ७८५ प्रतिघाते। अरुटत्-अरोटिष्ट॥

783. √Ruṭa, 784 √Luṭa, 785 √Luṭha, to strike against, resist The roots ruṭ and luṭ end with ṭ ट; the last लुठ luṭh ends with ṭh ठ। Pre. रोटते। Per. रुरुटे। I Fut. रोटिता। Aorist. अरोटिष्ट or अरुटत्॥

784. √Luṭa, Pre. लोटते। Per. लुलुटे। I Fut. लोटिता। Aorist. अलुटत्॥

785. √Luṭha, Pre. लोठते। Per. लुलुठे। I Fut. लोठिता। Aorist. अलुठत् or अलोठिष्ट॥

शुभ ७८६ दीप्तौ ।

786. √Śubha, to shine. Pre. शोभते । Per. शुशुभे । Aor. अशुभत् । Caus. शोभयति । Desi. शुशुभिषते । शुशोभिषते । Inten. शोशुभ्यते । Yaṅ luk शोशोभीति । Ger. शोभित्वा or शुभित्वा ॥

क्षुभ ७८७ संचलने ।

787. √Kshubha, to shake, tremble, to be agitated or disturbed.

Mâdhavîya gives the meaning of sañchalana as "[illegible]" । This root belongs to Divâdi and Kryâdi classes also. Pre. क्षोभते । Per. चुक्षुभे । Aorist अक्षोभिष्ट or अक्षुभत् । Past Part. Pass. क्षुब्धः or क्षुभितः ॥

णभ ७८८, तुभ ७८९ हिंसायाम् । आद्योऽभावेऽपि । 'नभन्तामन्यके समे' । 'मा भूवन्नन्यके सर्वे' इति निरुक्तम् । अनभत् । अनभिष्ट । इमौ दिवादौ क्र्यादौ च ॥

788. √Ṇabha, 789 √Tubha, to injure, to hurt. णभ means 'deprivation' also. Thus in the Nirukta we find "नभन्ताम् अन्यके समे" explained as "मा भूवन्नन्यके सर्वे" । So also the Bhâshya explains the word नभन्ताम् by मा भवन्तु in the following नभन्तामन्यके । [illegible] । Pre. नभते (प्रणभते) । Per. नेभे । Aorist अनभिष्ट or अनभत् । Noun नभः "sky," "Ocean."

789. √Tubha, to hurt, injure. This and the last root belong to Divâdi and Kryâdi classes also. Pre. तोभते । Per. तुतुभे । I Fut. तोभिता । Aorist अतुभत् or अतोभिष्ट

स्रंसु ७९०, ध्वंसु ७९१, भ्रंसु ७९२ अवस्रंसने । ध्वंसु ७९३ गतौ च । अङि न लोपः । अस्रसत्—अस्रंसिष्ट । 'नास्रसत्करिणां ग्रैवम्' इति रघुकाव्ये । 'भ्रंशु' इत्यपि केचित्पेठुः । अत्र तृतीय एव तालव्यान्त इत्यन्ये । 'भ्रंसु भ्रंशु अधःपतने' इति दिवादौ ॥

790. √Sraṅsu, 791 √Dhvaṅsu, 792 √Bhraṅsu, to fall or drop down, slip off or down. ध्वंसु means 'to go' also. Before the Aorist in अङ् there is elision of the nasal, and the form is अस्रसत् as in the following verse of Raghuvaṅśa, नास्रसत् करिणां ग्रैवम् । Some read here भ्रंशु also. Pre. स्रंसते । Per. सस्रंसे । I Fut. स्रंसिता । Aorist अस्रसत् or अस्रंसिष्ट । Desi. सिस्रंसिषते । Inten. सनीस्रस्यते । Yaṅ luk सनीस्रंसीति । सनीस्रस्तः । Past Part. Pass. स्रस्तम् । Gerund स्रंसित्वा or स्रस्त्वा । Noun उखास्रत् ॥

791. √Dhvaṅsu, to fall down. Pre. ध्वंसते । Per. दध्वंसे । I Fut. ध्वंसिता ॥

792. √Bhraṅsu, to fall down. Pre. भ्रंसते । Per. बभ्रंसे । I Fut. भ्रंसिता ॥

793. √Dhvaṅsu, to go. Pre. ध्वंसते । Per. दध्वंसे । I Fut. ध्वंसिता ॥

स्रम्भु ७९४ विश्वासे । अस्रभत्—अस्रम्भिष्ट । दन्त्यादिरयम् । तालव्यादिस्तु प्रमादे गतः ॥

794. √Srambhu, to confide. This root begins with a dental sibilant (स), that which begins with a palatal sibilant (श) has already been taught before in the sense of carelessness. See root no. 420. Pre. स्रम्भते । Per. सस्रम्भे । I Fut. स्रम्भिता । Aorist अस्रभत् or अस्रम्भिष्ट । Caus. स्रम्भयति । Aor. असस्रम्भत् । Desi. सिस्रम्भिषते । Intensive सास्रभ्यते । Ger. स्रम्भित्वा or स्रब्ध्वा । Noun विस्रब्धिः ॥

वृतु ७९५ वर्त्तने । वर्त्तते । ववृते ॥

795. Vṛitu, to be, exist, abide, remain, stay. Pre. वर्त्तते । Per. ववृते । I Fut. वर्तिता । II Fut. वर्तिष्यते । This is optionally Parasmaipadi by I. 3. 92. S. 2347 below वर्त्स्यति । When Parasmaipadi, the root does not take the augment इट् by VII. 2. 59. S. 2348 below. Imperative. वर्त्तताम् । Imper. अवर्त्तत । Poten. वर्तेत । Bene. वर्तिषीष्ट । Aorist अवृतत् or अवर्तिष्ट । Condi. अवर्तिष्यत or अवर्त्स्यत् । Caus. वर्त्तयति । Aorist अववर्तत् or अवीवृतत् । Desi. विवर्तिषते or विवृत्सति । Inten. वरीवृत्यते । Nouns वर्तिष्णुः । वृत्त, वर्त्मन् । वृत्तिः ॥

२३४७ । वृद्भ्यः स्यसनोः । १ । ३ । ९२ ॥

वृता दिभ्यः परस्मैपदं वा स्यात्स्ये सनि च ॥

2347. After the verbs 'vṛit' to exist &c., Parasmaipada is optionally employed when the affixes sya (second Future and conditional) and san (Desiderative) follow.

The वृतादि verbs are five in number and are included in the द्युतादि subclass. They are वृत् 'to be,' वृध् 'to grow', शृधु 'to fart or break wind'; स्यन्द् 'to ooze,, and कृपू 'to be able.' As Future वर्त्स्यति or वर्तिष्यते, 'it will be,' Conditiona अवर्त्स्यत् or अवर्तिष्यत ; Desiderative विवृत्सति or विवर्तिषते &c.

In other tenses than the above, they are always Atmanepadi. As वर्तते 'It is.

२३४८ । न वृद्भ्यश्चतुर्भ्यः । ७ । २ । ५९ ॥

एभ्यः सकारादेरार्धधातुकस्य इट् न स्यात्तङानयोरभावे । वर्त्स्यति-वर्तिष्यते । अवर्त्स्यत्-अवर्तिष्यत । अवर्त्स्यत्-अवर्तिष्यत ॥

2348. The Parasmaipada ârdhadhâtuka affixes beginning with स do not get the augment इट् after वृत् and the three roots that follow it.

Thus वृत्—वर्त्स्यति, अवर्त्स्यत्, विवृत्सति । वृध् वर्त्स्यति । अवर्त्स्यत् । विवृत्सति शृधु । शर्त्स्यति । अशर्त्स्यत् । शिशृत्सति । स्यन्दू । स्यन्त्स्यति । अस्यन्त्स्यत् ॥

The वृतादि roots are four वृत्, वृध्, शृध्, and स्यन्द् (Bhu. 795-798). In the examples, the Parasmaipada forms are shown, because these roots are optionally Parasmaipadi by I. 3. 92 before स्य and सन् ॥

Obj :—The word चतुर्भ्यः may conveniently have been omitted from the sûtra. A reference to the Dhâtupâṭha will show that the वृतादि roots form a subdivision of द्युतादि roots, and stand at the end of Dyutâdi class. So that the sûtra न वृद्भ्यः would have been enough, and there would have been no uncertanity or vagueness about it, for the word वृतादि would mean 'the roots वृत् &c. with which the Dyutâdi class ends.' Thus we shall get the *five* roots 795 वृतु वर्तने 796 वृधु वृद्धौ, 797 शृधु शब्दकुत्सायाम् ; 798 स्यन्दू प्रस्रवणे and कृपू सामर्थ्ये । As regards the last root कृपू, we shall find from the next sûtra, that the present sûtra applies to this root also. Or we can change the order of the roots, putting कृपू first, and वृतु &c. after it, so that वृतादि will mean *four* roots only. Whether vṛitâdi be taken to mean the *five* or the *four* roots, the word चतुर्भ्यः is redundant.

Ans :—The word चतुर्भ्यः is used in order that the prohibition contained in this sûtra may debar the 'option' which the root कृपू would have taken, because

of its indicatory long ऊ (VII. 2. 44). For this 'option' is an antaranga operation, because it applies to *all* ârdhadhâtuka affixes; while the 'prohibition' of the present sûtra is a bahiranga, because it applies to those affixes only which begin with स। So that the 'prohibition' of this sûtra would not have debarred the 'option' of VII. 2. 44: and in the Parasmaipada स्यन्दू would have had two forms; which, however, is not the case because of the word चतुर्भ्यः by which the 'prohibition' is extended to स्यन्दू also. Thus in the Parasmaipada, we have only one form, as, स्यन्त्स्यति; but in the Atmanepada we have *two* forms स्यन्दिष्यते or स्यन्त्स्यते ॥

The word 'Parasmaipada' is understood in this sûtra, so that the prohibition does not apply to âtmanepada affixes: as वर्तिषीष्ट, वर्तिष्यते, अवर्तिष्यत, विवर्तिषते, स्यन्दिषीष्ट or स्यन्त्सीष्ट। Moreover, with regard to Atmanepada also, the इट् is added to these roots when they stand in the same 'pada' with the affixes. But when the Atmanepada affixes are added not to the *roots* 'vṛit &c,' but to the *roots* which are derived from the *nominal* bases formed from 'vṛit &c,' then the '*root*' is not in the same pada with the affix, and the prohibition of this sûtra will apply. As विवृत्सीयते। Moreover, the rule applies, as we have said, to the affixes standing in the same 'pada' with the 'roots'; therefore it will apply to Desiderative roots, as विवृत्सति, though शप् here intervenes between the ârdhadhâtuka affix सन् and the Parasmaipada तिप्; so also, an ekâdeśa though sthânivat and therefore an intervention, will not be considered so for the purposes of this rule, as विवृत्सिष्यति; so also in विवृत्सयति। The prohibition, moreover, applies to शतृ affixes, and where there is luk-elision of Parasmaipada affixes. As विवृत्सता। and विवृत्सत्वम् where the Imperative हि is luk-elided, and being so elided, the force of Parasmaipada does not here remain by न लुमताङ्गस्य (I. 1. 63); hence the above *Isht.*

वृधु ७९६ वृद्धौ ।

796. √Vṛidhu, to grow, increase. The conjugation is like that of वृत। Pre. वर्धते। Per. ववृधे। I Fut. वर्धिता। Noun. वर्धिष्णुः। वर्धनः। वृद्धः ॥

शृधु ७९७ शब्दकुत्सायाम् । इमौ वृतिवत् ॥

797. √Śridhu, to break wind downwards. Conjugated like वृत। Pre. शर्धते। Per. शशृधे। I Fut. शर्धिता ॥

स्यन्दू ७९८ प्रस्रवणे । स्यन्दते। सस्यन्दे। सस्यन्दिषे-सस्यन्त्से। सस्यन्दिध्वे-सस्यन्द्ध्वे। स्यन्दिता-स्यन्ता। 'वृद्भ्यः स्यसनोः' (२३४०) इति परस्मैपदे कृते ऊदित्त्वप्राप्तमपि विकल्पं बाधित्वा चतुर्ग्रहणसामर्थ्यात् 'न वृद्भ्यः' (२३४८) इति निषेधः। स्यन्त्स्यति-स्यन्दिष्यते-स्यन्त्स्यते। स्यन्दिषीष्ट-स्यन्त्सीष्ट। 'द्युद्भ्यो लुङि' (२३४५) इति परस्मैपदपक्षेऽङ्। नलोपः। अस्यदत्-अस्यन्त। अस्यन्त्साताम्। अस्यन्त्सत। अस्यन्त्स्यत्-अस्यन्दिष्यत-अस्यन्त्स्यत ॥

798. √Syandû, to ooze, trickle, drop, distil. The स is changed to ष optionally when preceded by अनु &c. See VIII. 3. 72 S. 2349. Pre. स्यन्दते। Per. सस्यन्दे। सस्यन्दिषे or सस्यन्त्से। सस्यन्दिध्वे or सस्यन्द्ध्वे। सस्यन्दिवहे or सस्यन्द्वहे। I Fut. स्यन्दिता or स्यन्ता। II Fut. स्यन्दिष्यते or स्यन्त्स्यति or स्यन्त्स्यते। Impera. स्यन्दताम्।

Imper. अस्यन्दत । Poten. स्यन्देत । Bene. स्यन्दिषीष्ट or स्यन्त्सीष्ट । Aorist. (1) अस्यन्दिष्ट । (2) अस्यदत् or (3) अस्यन्त । (1) अस्यन्त्साताम् or अस्यन्साताम् । (2) अस्यदताम् । [When the root takes the affixes of the Parasmaipada, then the Aorist is formed by अङ् (S. 2345), before which the nasal is elided]. Condi. (1) अस्यन्दिष्यत or (2) अस्यन्त्स्यत or (3) अस्यन्त्स्यत् । Desi. सिस्यन्दिषते, सिस्यन्त्सते, सिस्यन्त्सति । Inten. सास्यन्द्यते । Past. Pass. स्यन्नः । Ger. स्यन्दित्वा or स्यन्त्वा । Nouns. सिन्धुः । सैन्धवः ॥

२३४९ । अनुविपर्यभिनिभ्यः स्यन्दतेरप्राणिषु । ८ । ३ । ७२ ॥

एभ्यः परस्याप्राणिकर्तृकस्य स्यन्दतेः सस्य षो वा स्यात् । अनुष्यन्दते – अनुस्यन्दते वा जलम् । 'अप्राणिषु' किम् । अनुस्यन्दते हस्ती । 'अप्राणिषु' इति पर्युदासात् 'मत्स्योदके अनुष्यन्देते' इत्यत्रापि पक्षे षत्वं भवत्येव । 'प्राणिषु न' इत्युक्तौ तु न स्यात् ॥

2349. ष is optionally the substitute of the स of स्यन्द्, after the prepositions अनु, वि, परि, अभि and नि, when the subject is not a living being.

The root स्यन्दू प्रस्रवणे is anudâtta. Thus अनुष्यन्दते । विष्यन्दते । परिष्यन्दते । अभिष्यन्दते तैलम् । निष्यन्दते । अनुस्यन्दते । विस्यन्दते । परिस्यन्दते । Thus अनुष्यन्दते or अनुस्यन्दते जलम् ॥

Why do we say 'when the subject is not a living being'? Observe अनुस्यन्दते हस्ती । The option of this sûtra will apply, when the subject is a compound of living and non-living beings. Thus अनुस्यन्देते or अनुष्यन्देते मत्स्योदके । The subject here is a Dvandva compound, and it is not in the singular number because of II. 4. 6. The word अप्राणिषु is a Paryudâsa and not a Prasajya-pratishedha. If it be the latter sort of prohibition, then the force will be on the word *living*, and in a compound like मत्स्योदके, consisting of *living* and *non-living* beings, the prohibition will apply because it has a *living* being in it, and so there will be no षत्व । In the other view, the force is on the word *non living*, and because the compound contains a non-living being, therefore the option will be applied, and the presence of the living being along with it will be ignored.

The anuvritti of परि, नि and वि is understood here from VIII. 3. 70. So these words could well have been omitted from the sûtra, which might have then been अन्वभिभ्यांच स्यन्दतेरप्राणिषु, and by the force of च we would draw in the anuvritti of परि &c.

799 कृपू सामर्थ्ये । In conjugating this root, the following applies.

२३५० । कृपो रो लः । ८ । २ । १८ ॥

'कृपः' 'रः' इति छेदः । 'कृप' इति लुप्तषष्ठीकम् । तच्चावर्तते । कृपेरो रेफस्तस्य लः स्यात् । कृपेर्ऋकारस्यावयवो यो रो रेफसदृशस्तस्य च लकारसदृशः स्यात् । कल्पते । चक्लृपे । चक्लृपिषे – चक्लृप्से इत्यादि स्पष्टम् ॥

2350. For the र of the root कृप् there is substituted ल ॥

The word कृपो is compounded of कृप + उः । The term कृप is used with the force of the genitive, the case-ending is considered as latent. It is repeated. The meaning is "In the place of the र of कृप there is ल । In the place of the र-sound which is a portion of the ऋ of कृप and therefore which may be considered as like-र, there is substituted something which is like ल । That is when कृप assumes by

guṇa &c the form कर्प् &c, then for र is substituted ल and we have कल्प । But even with क्लृप, a l-sound like ऌ is substituted for ऋ, and we have क्लृप" । As कल्पते, चक्लृपे &c like स्वरिद्ध ॥

The र here merely indicates the sound, and includes both the single consonant र and the same consonant of the vowel ऋ । So also with ल । So that for the single र there is substituted ल ; and for र when a portion of ऋ, the ऌ is substituted, i.e. ऋ becomes ऌ । Thus कृप=क्लृप, as in the sûtra लुटि च क्लृपः (I. 3. 93.) कल्प्ता, कल्प्तारौ, कल्प्तारः । कृपणः । कृपणवान् ॥

The word कृपा is derived from the root कृप् by vocalisation, as it has been enumerated in Bhidâdi class (षिद्भिदादिभ्योऽङ् III. 3. 104). The vocalised root-form कृप is not to be taken here, as it is a lâkshaṇika form.

Vârt :—The words कृपण, कृपाण, कृपीट, कर्पूर &c, are also from कृप् । Or by the Uṇâdi diversity, the ल change does not take place.

Vârt :—Optionally so of बाल &c. As, बालः or वारः, मूलम् or मूरम् । लघु or रघु, अङ्गुलि: or अङ्गुरि:, जलम् or जरम्, अङ्गुलिः or अङ्गुरिः ॥

Vârt :—Optionally so in the Vedas, or when names, of कपिलका &c, as कपिरकः or कपिलकः, तिल्पिलीकम् or तिर्पिरीकम्, लोमानि or रोमाणि, पांसुरं or पांसुलं, कर्म or कल्म, शुक्रः or शुक्लः, कल्मषं, कर्मषं ॥

Some say 'र and ल are one': and operations regarding र may be performed with regard to ल ॥

In forming the FirstFuture, the next sûtra applies.

२३५१ । लुटि च क्लृपः । १ । ३ । ९३ ॥

लुटि स्यसनोश्च क्लृपेः परस्मैपदं वा स्यात् ॥

2351. After the verb klip 'to be fit', Parasmaipada is optionally employed, when luṭ (1st Future) is affixed, as well as when sya and san are affixed.

The verb क्लृप् is one of the five verbs of the sub-class, वृतादि । (I. 3. 92. S. 2347). Therefore it will take both Parasmaipada and Atmanepada, when the affixes स्य or सन् follow. The present sûtra makes the additional declaration in the case of the 1st Future or लुट्. Thus in Luṭ we have :—कल्प्तासि or कल्प्तासे ; in the 2nd Future we have :—कल्पिष्यते or कल्प्स्यति, in the Desiderative we have :—चिक्लृप्सति or चिकल्पिषते ; in the Conditional we have :—अकल्प्स्यत् or अकल्पिष्यत ॥

२३५२ । तासि च क्लृपः । ७ । २ । ६० ॥

क्लृपेः परस्य तासेः सकारादेरार्धधातुकस्य चेण्न स्यात्तङानयोरभावे । कल्प्तासि । कल्प्तास्मि । कल्पितासे । कल्प्तासे । कल्प्स्यति । कल्पिष्यते । कल्प्स्यते । कल्पिषीष्ट — क्लृप्सीष्ट । अक्लृपत् — अकल्पिष्ट — अक्लृप्त । अकल्प्स्यत् — अकल्पिष्यत — अकल्प्स्यत । घट । घटः संघुष्टो द्युतादिर्घ — टादिश्चेत्यर्थः ॥

2352. The (Parasmaipada) Ârdhadhâtuka affixes beginning with स, and the affix तास् (the sign of the Periphrastic Future) do not get the augment इट्, after the root क्लृप् except in the Âtmanepada affixes.

Thus कल्प्ता, कल्प्स्यति, अकल्प्स्यत्, चिक्लृप्सति । But कल्पिताहे, कल्पिषीष्ट, कल्पिष्यते, अकल्पिष्यत, चिकल्पिषते in the Atmanepada.

In the case of कृपू also, the इट् is added to the ârdhadhâtuka affixes in the Âtmanepada, when the root stands in the same pada with the affixes and there is prohibition everywhere else. So also there is prohibition before kṛit-affixes, and the luk-elision of Parasmaipada. As चिक्लृपिषिता, चिक्लृप्सु त्वं ॥

According to Padamanjari, these two sûtras could have been shortened thus:—(1) न वृद्भ्यः पञ्चभ्यः, (2) तासि च ; and "कृपः" could well have been omitted. The तास् comes only after कृपू and not after other roots of Vṛitâdi class, in Parasmaipada [1. 3. 92 and 93]. Therefore, there is no fear that the prohibition तासि च will apply to the other roots of vṛitâdi, but only to 'klip,' because the word परस्मैपदेषु is understood here ; and as no roots of vṛitadi class take Parasmaipada in the Periphrastic Future except 'klip', there is no fear of any ambiguity.

कृप ७९९ सामर्थ्ये ।

799 √Kripû, to be fit or adequate for. By VIII. 2. 18 S. 2350 the ऋ of this root is changed to ऌ । Pre. कल्पते । Per. चक्लृपे । चक्लृपिषे or चक्लृप्से । I Fut. कल्प्ता । कल्प्तारौ । कल्प्तारः । कल्प्तासि or कल्पितासे or कल्प्तासे । कल्प्तास्थः । कल्प्तास्थ । II Fut. कल्पिष्यते । कल्प्स्यते । कल्प्स्यति । Imperative कल्पताम् । Imper. अकल्पत । Pote. कल्पेत । Bene. कल्पिषीष्ट । कॢप्सीष्ट । Aorist अक्लृपत् or अकल्पत् or अकल्पिष्ट । Condi. अकल्पिष्यत or अकल्प्स्यत् । Inten. चलीक्लृप्यते । Yan luk चल्कल्प्मि or चलिकल्प्मि or चलीकल्पिम ।

वृत् । "Vṛit" *here means that the Dyutâdi and the Vṛitâdi roots end here.*

अथ त्वरत्यन्तास्त्रयोदशानुदात्तेतः षितश्च ॥

Now the thirteen roots ending with त्वरति No. 812 are anudatteta and ṣhit.

घट ८०० चेष्टायाम् । घटते । जघटे । घटादयो मितः इति वक्ष्यमाणेन मित्संज्ञा । तत्फलं तु मितां ह्रस्वः (२५६८) इति चिण्णमुलोर्दीर्घोऽन्यतरस्याम् (६।४।९२) इति च वक्ष्यते । घटयति । विघटयति । कथं तर्हि 'कमलवनोद्घाटनं कुर्वते ये' 'प्रविघाटयिता समुत्पतन्हरिदश्वः कमलाकरानिव' इत्यादि । शृणु । घट संघाते इति चौरादिकस्येदम् । न च तस्यैवार्थविशेषो मित्त्वार्थमनुवादोऽयमिति वाच्यम् । नान्ये मितोऽहेतौ इति निषेधात् । अहेतौ स्वार्थे णिचि ज्ञपादिपञ्चकव्यतिरिक्ताश्चुरादयो मितो नेत्यर्थः ॥

1031. √Gamlṛi to go. Pre. गच्छति। Per. जगाम। जग्मतुः। जग्मुः। जगन्थ or जगमिथ। जग्मिव। जग्मिम। I Fut. गन्ता। II Fut. गमिष्यति। Imperative. गच्छतु। Imper. अगच्छत्। Poten गच्छेत् Bene. गम्यात्। Aorist अगमत्। Pas. गम्यते। Caus. गमयति। Aorist, अजीगमत्। Inten. जंगम्यते। Yaṅ luk जंगमीति। or जङ्गन्ति। D. जङ्गतः Pl. जङ्गमति। Ist. S. जङ्गन्मि D. जङ्गन्वः। *Nouns*:—जङ्गमः। गमः। जगत् गीः। गन्ता ॥

1032. √Sṛiplṛi to go. Pre. सर्पति। Per ससर्प। ससृपतुः। ससर्पिथ। ससृपिव I Fut. स्रप्ता, सर्प्ता। II Fut. स्रप्स्यति, सर्प्स्यति। Imper. सर्पतु। Imper. असर्पत्। Pote सर्पेत्। Bene. सृप्यात्। Aor. असृपत्। असृपताम्। Caus. सर्पयति। Aorist असीसृपत्। or असस्र्पत्। Deside. सिसृप्सति। Intin. सरीसृप्यते। Yaṅ luk सरीसृपीति। or सरीसर्प्ति। or सरासृप्ति। Aorist सरासृपः। Adj. सृ। सृप्यः। Nouns:—सर्पः। सर्पिः। सरीसृपः।

यम १०३३ उपरमे। यच्छति। येमिथ-ययन्थ। यन्ता। अयंसीत् अयंसिष्टाम्।

1033. √Yama to check, curb, restrain. 'According to Maitreya, the root has an indicatory ष। Pre यच्छति। (VII. 3. 77 S. 2400). Per. ययाम। येमतुः। येमुः। येमिथ or ययन्थ। I Fut. यन्ता। II Fut. यंस्यति। Imperative यच्छतु। Imper. अयच्छत्। Poten. यच्छेत्। Bene. यम्यात्। Aorist. अयंसीत्। अयंसिष्टाम्। Caus. यमयति। Aorist, अयीयमत्। Desi. यियंसति। Inten. यंयम्यते। Yaṅ luk. यंयन्ति। यंयतः। Adj. याम्यम्। Nouns. यमुना। यमः। संयत्। संयमः ॥

तप १०३४ संतापे। तप्ता। अताप्सीत् ॥

1034. √Tapa to suffer pain.

As 1st. Future तप्ता। Aorist अताप्सीत् ॥

The स of the preposition निस् is changed to ष when followed by this root by the following sûtra:—

२४०३ । निसस्तपतावनासेवने । ८ । ३ । १०२ ॥

षः स्यात् । आसेवनं पौनः पुन्यं ततोऽन्यस्मिन्विषये । निष्टपति ॥

2403. ष is substituted for the स of निस before the verb तप, when the meaning is not that of 'repeatedly making red hot.'

The word आसेवन means doing a thing repeatedly and here it means making it red-hot repeatedly. Thus निष्टपति: सुवर्णम् = सकृत् अग्निम् स्पर्शयति i. e., he puts the gold into fire only once.

Why do we say when not meaning repeatedly. Observe निस्तपति सुवर्णं सुवर्णकारः=पुनः पुनरग्निं स्पर्शयति ॥

Note:—In the sentences निष्टप्तं रक्षः, निष्टप्ता अरातयः the change has taken place either as a Vaidic irregularity or because the sense of repeatedness is not implied here.

1034. √Tapa, to suffer pain; to mortify the body. Pre. तपति । Per. तताप । तेपिथ or ततप्थ । I Fut. तप्ता । Imperative तपतु । Imper. अतपत् । Poten. तपेत् । Bene. तप्यात् । Aorist. अताप्सीत् । अताप्ताम् । Pas. तप्यते । Caus. तापयति । Aorist अतीतपत् । Desi. तितप्सति । Inten. तातप्यते । Yañ luk तातप्ति । Adj. तप्यम् । Nouns:—संतापः । तापकः । तपः । तपस्या । तपस्वी ॥

त्यज १०३५ हानौ । तत्यजिथ—तत्यक्थ । त्यक्ता । अत्याक्षीत् ॥

1035. √Tyaj to abandon. Pre. त्यजति । Per. तत्याज । तत्यजतुः । तत्यजिथ or तत्यक्थ । तत्यजिव । I Fut. त्यक्ता । II Fut. त्यक्ष्यति । Imperative त्यजतु । Imper. अत्यजत् । Poten. त्यजेत् । Bene. त्यज्यात् । Aorist अत्याक्षीत् । अत्याक्ताम् । Caus. त्याजयति । Aorist. अतित्यजत् । Desi. तित्यक्षति । Inten. तात्यज्यते । Yañ luk तात्यक्ति । Nouns:—त्यागिन् । त्यागः । त्यक् ॥

षञ्ज १०३६ सङ्गे । 'दंशसञ्जस्वञ्जां शपि' (२३९६) इति न लोपः । सजति । सङ्क्ता ।

1036. √Shanj, to stick or adhere to, cling to. The nasal is elided by VI. 4, 25 S. 2396. Pre. सजति । (With the preposition अभि, we have अभिषजति) । Per. ससञ्ज । ससञ्जतुः । ससङ्क्थ or ससञ्जिथ । ससञ्जिव । I Fut. सङ्क्ता । II Fut. सङ्क्ष्यति । Imperative सजतु । Imper. असजत् । Poten. सजेत् । Bene. सज्यात् । Aorist. असाङ्क्षीत् । असाङ्क्ताम् । Desi. सिसङ्क्षति । Nouns. निषङ्गः, संगः । प्रसङ्गः । सक्थि ॥

दृशिर १०३७ प्रेक्षणे । पश्यति ॥

1037. √Driśir 'to see.' The root is replaced by पश्य by VII. 3. 78 S. 2360. Thus Present is पश्यति ॥

In the conjugation of the Perfect (2nd Person. Singular) the following two sûtras apply:—

२४०४ । विभाषा सृजिदृशोः । ७ । २ । ६५ ॥

आभ्यां थल इड्वा ॥

2404. थल् the Personal ending of the Perfect, optionally gets the augment इट् after सृज् and दृश् ॥

Note:—As ससर्ष्ठ or ससर्जिथ, दद्रष्ठ or ददर्शिथ । See VI. 1. 58 below for the अम् augment.

२४०५ । सृजिदृशोर्झल्यमकिति । ६ । १ । ५८ ॥

अनयोरमागमः स्याज्झलादावकिति । ददृष्ठ–ददर्शिथ । द्रष्टा । द्रक्ष्यति । दृश्यात् । इरित्वादङ् वा ॥

2405. The augment अम् (अ) comes after the ऋ of सृज् 'to create,' and दृश् 'to see,' when an affix beginning with a झल् letter (the Mute and the Sibilant) follows: provided that it has no indicatory क् ॥

Thus where there is इट् augment we have ददर्शिथ; but when there is no इट् augment, we have the अम् and thus get ददृष्ठ ॥

1st. Fut. द्रष्टा; 2nd. Fut. द्रक्ष्यति । Ben. दृश्यात् । As the root has an indicatory इर् the aorist is formed optionally by अङ् (III. 1. 57. S. 2269). When there is अङ् the following sûtra applies:—

NOTE:—Thus सृज् + तृच्=स + ऋ+अ + ज् + तृ = स्रष्टृ । Nom. sing. स्रष्टा, so also स्रष्टुम्, स्रक्ष्यम्, द्रष्टा, द्रष्टुम्, द्रष्टव्यम् । This अम् augment prevents the guṇa substitute ordained by VII. 3. 86. But in असाक्षीत् and अद्राक्षीत् the Vṛiddhi takes place in the Aorist, after the augment अम् had taken effect.

Why do we say when beginning with a Mute or a Sibilant? Observe सर्जनम्, दर्शनम् with ल्यु । Why do we say not having an indicatory क्? Observe सृष्टः, दृष्टः, before the affix क्त । The forms of roots being exhibited in the sûtra, the rule applies when affixes relating to verbs come after these, and not when other affixes relating to nouns follow. Thus रज्जुसृड्भ्याम्, । देवदृग्भ्याम् । Here the words are used as nouns rather than verbs. For the maxim धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यं applies here.

२४०६ । ऋदृशोऽङि गुणः । ७ । ४ । १६ ॥

ऋवर्णान्तानां दृशेश्च गुणः स्यादङि । अदर्शत् । अङभावे ॥

2406. Guṇa is substituted for the vowel of the root, before the affix अङ्, in the roots ending in ऋ or ॠ, as well as in दृश् ॥

Thus अदर्शत् । But when अङ् is not added the following sûtra applies:—

NOTE:—As शकलाङ्गुष्ठकोऽकरत्, मा त्वेभ्योऽकरं नमः, असरत्, आरत्, अदर्शत्, अदर्शताम्, अदर्शन् । The affix अङ् means the Aorist character अङ् of which the above examples are given. It also is the kṛit-affix (III. 3. 104), of which we have जृ—जरा ॥

The word अकरत् is अङ् Aorist formed from कृ by III. 1. 59. The word असरत् is सृ (III. 1. 56). अदर्शत् by VI. 1. 57.

२४०७ न दृशः । ३ । १ । ४७ ॥

दृशश्च्लेः क्सो न । अद्राक्षीत् ॥

2407. क्स is not the substitute of च्लि after the verb दृश् 'to see.' Thus अद्राक्षीत् ॥

NOTE:—This is an exception to the sûtra III. 1. 45. enjoining क्स । The root दृश् will form its Aorists by III. 1. 57. and will take अङ्, and सिच्; as अदर्शत् or अद्राक्षीत् 'he saw.'

1037. √ Driśir to see. The root is Âtmanepadi, with the preposition सम् । As सम्पश्यते । Pre. पश्यति । Per. ददर्श । ददृशतुः । ददर्शिथ or ददष्ठ । ददृशिम । I Fut. द्रष्टा । II Fut. द्रक्ष्यति । (VIII. 2. 41. S. 295). Imperative पश्यतु । Poten. पश्येत् । Bene. दृश्यात् । Aorist अदर्शत् or अद्राक्षीत् । Pass. दृश्यते । Aorist अदर्शि । Caus. दर्शयति । Aorist. अदीदृशत् or अददर्शत् । Desi. दिदृक्षते । (1. 3. 57 S. 2731). Inten. दरीदृश्यते । Yaṅ luk

दर्दृंष्ठि । ददंष्ठः । Imperative. ददंदंष्ठि । 1st. S. ददृशामि । Imperfect. अदर्दन् । Nouns दृशनम् । दर्शनम् । दशुः । दृष्टिः । दृश्वरी ॥

दंश १०३८ दशने । दशनं दंष्ट्राव्यापारः । पृषोदरादित्वादनुनासिकलोपः । अत एव निपातनादित्येके । तस्याप्ययमेव तात्पर्यम् । अर्थनिर्देशस्याधुनिकत्वात् । 'दंशसञ्ज—' (२३९६) इति न लोपः । दशति । ददंशिथ—ददंष्ठ । दंष्टा । दंक्ष्यति । दश्यात् । अदांक्षीत् ।

1038. √Danśa to bite. The word daśana 'actions of the teeth' i. e. biting The word दशन is derived from this root. The nasal is elided by VI. 3. 109. S. 1034. Others say, the nasal is elided as a nipâtana or anomaly, because the word दशन् is so exhibited here.' They also refer to this because the particularising of the meaning is modern. In other words, they also mean that दशन has lost its nasal because such is the usage of the masters of language, for Prishodarâdi only validates the usage of the shishtas. But in the Dhâtupâṭha sûtra दंश दशने the meaning दशन given to दंश is not the work of any ancient author: for all Dhâtupâtha *meanings* are recent additions to the bare list of *roots* prepared by Pâṇini: so any form occurring in these *meanings* cannot *ipso facto* be a standard. Therefore those who say that दशन is valid by nipâtana here must be presumed to mean that standard writers have used the word *dasana*, which has been repeated here by the person or persons who have added these meaning to the roots. There they also indirectly mean that the form is valid under the Prisodarâdi class.

Thus दंश + शप् + ति = दश् + अ + ति (the nasal is elided by VI. 4. 25. S. 2396)= दशति । The 2nd. Per. Singular of the perfect is ददंशिथ or ददंष्ठ । First Future दंष्टा । Second Future दङ्क्ष्यति । Benedictive दश्यात् । Aorist अदाङ्क्षीत् ॥

1038. √Danśa to bite, sting. Pre. दशति । *Per. ददंश । ददंशतुः । ददंशिथ or ददंष्ठ । ददंशिव । I Fut. दंष्टा । II Fut. दङ्क्ष्यति । Imperative दशतु । Imper. अदशत् । Poten. दशेत् । Bene. दश्यात् । Aorist अदांक्षीत् । अदांष्टाम् । Caus. दंशयति । Aorist अद । दंशत् । Desi. दिदङ्क्षति । Inten दंदश्यते । (III. 1. 24, S. 2635. VII. 4. 84, S. 2638) Yañ luk. दन्दशीति or दन्दष्टि । Nouns दंष्ट्रा । दंष्ट्री । दंदशूकः ॥

कृष १०३९ विलेखने । विलेखनमाकर्षणम् । क्रष्टा—कर्ष्टा । क्रक्ष्यति— कर्क्ष्यति । * स्पृशमृशकृषतृपदृपां च्लेः सिज्वा वाच्यः * । अक्राक्षीत् । अक्राष्टाम् । अकार्क्षीत् । अकार्ष्टाम् । अकार्क्षुः । पक्षे क्सः । अकृक्षत् । अकृक्षताम् । अकृक्षन् ।

1039. √Krish to plough, till. The word vilekhana means tilling. The First-Future is क्रष्टा or कर्ष्टा । Second Future is क्रक्ष्यति or कर्क्ष्यति । The Aorist sign सिच् is optional under the following

Vârtika. The सिच् of the Aorist is optional after the roots √Spriś; √Mriś, √Krish, √Trip, and √Drip. Thus अक्राक्षीत् or अकार्क्षीत् । D. अक्राष्टा or अकार्ष्टाम् । When सिच् is not added we have क्स, as अकृक्षत् । &c. Pre. कर्षति । Per. चकर्ष । चकृषतुः । चकर्षिथ । चकृषिव । I Fut. क्रष्टा, कर्ष्टा । (VI. 1. 59. S. 2402). II Fut. क्रक्ष्यति, कर्क्ष्यति । Imperative कर्षतु । Imper. अकर्षत् । Poten. कर्षेत् । Bene. कृष्यात् । Aorist. अक्राक्षीत्, or अकार्क्षीत् । Dual. अकृक्षताम् or अक्राष्टाम् or अकार्ष्टाम् । Plural अकार्क्षुः or अकृक्षन् । Con. अक्रक्ष्यत् । Caus. कर्षयति । Aorist. अचीकृषत् or अचकर्षत् । Desi. चिकृक्षति । Inten. चरीकृष्यते । Yañ luk चरिकर्ष्टि । चरिकर्ष्टि or चरिकृषीति । D. चरीकृष्टः or चरिकृष्टः । Imperative चरीकृड्ढि । Imperfect अचरीकर्ट् or अचरीकट् । Noun:—कर्षः ॥

दह १०४० भस्मीकरणे । देहिथ—ददग्ध । दग्धा । धक्ष्यति । अधाक्षीत् । अदाग्धाम् । अधाक्षुः ॥

1040. √Daha to burn. Pre. दहति। Per. ददाह। देहतुः। देहिथ or ददग्ध (VIII. 2. 32. S. 325; VIII. 2. 40. S. 2280; VIII. 4. 53. S. 52). I Fut. दग्धा। II Fut. धक्ष्यति (VIII. 2. 32. S. 325, VIII. 2. 37. S. 326, VIII. 4. 55. S. 121).--Imperative दहतु। Imper. अदहत्। Poten. दहेत्। Bene. दह्यात्। Aorist. अधाक्षीत्। अदाग्धाम्। अधाक्षुः। Caus. दाहयति। Aorist. अदीदहत्। Inten. दंदह्यते। Yan luk दंदग्धि। Nouns:—परिदाही। निदाघः। अवदाघ। परिदाघः। दहनः॥

मिह १०४१ सेचने । मिमेह। मिमेहिथ। मेढा। मेक्ष्यति। अमिक्षत् ॥

1041. √Miha to wet, moisten, sprinkle. Pre. मेहति। Per. मिमेह। मिमेहिथ। मिमेढिथ। I Fut. मेढा। II Fut मेक्ष्यति। Imper. मेहतु। Imper. अमेहत्। Poten. मेहेत्। Bene. मिह्यात्। Aorist. अमिक्षत्। Caus. मेहयति। Aorist. अमीमिहत्। Desi. मिमिक्षति। Inten. मेम्मिह्यते। yan luk मेमेढि। मेमीढः। Perfect. Parti. मीढ्वान्। मेढम्। मेढ। मिहिरः। प्रमेहः।

Here end the Skandadi roots.

-:o:-

कित १०४२ निवासे रोगापनयने च । चिकित्सति। संशये प्रायेण विपूर्वः। 'विचिकित्सा तु संशयः' इत्यमरः। अस्यानुदात्तेत्त्वमाश्रित्य 'चिकित्सते' इत्यादि कश्चिदुदाजहार। निवासे तु केतयति ॥

1042. √Kita to live' 2. to heal, cure. when meaning to doubt, it is generally preceded by वि। Thus विचिकित्सा means doubt. see Amarakosha I. 5. 3 It is Parasmaipadi but some take it to be anudâtteta and so conjugate it in the Âtmanepadi. As चिकित्सते। when meaning to dwell, it is conjugated as केतयति। This root is *always* सन् ending in the sense of 'to heal.' 'to doubt.' See III. 1. 5. S. 2396. This सन् not being an Ardhadhâtuka affix, does not take इट् augment or cause Guṇa. Pre. चिकित्सति। "He cures." or केतयति। 'He dwells.' II Fut. चिकित्सिष्यति। Desi. चिकित्सिषति। As a general rule सन् is not added to a root which has already taken सन्। But that rule applies to the Desiderative सन् and not to the Svârtha सन्॥

दान १०४३ खण्डने ।

शान १०४४ तेजने । इतो वहत्यन्ताः स्वरितेतः। दीदांसति—दीदांसते शीशांसति—शीशांसते। अर्थविशेषे सन्। अन्यत्र दानयति। शानयति ॥

1043. √Dâna (to straighten) to cut, divide. 1044. √Śâna to sharpen. From this upto √Vaha the roots are svariteta. These roots are also *always* सन् ending (See III. 1. 6. S. 2394) When not meaning 'to straighten' and 'to whet' respectively, we have दानयति। शानयति in the Churâdi. Pre. दीदांसति A. दीदांसते। Caus. दानयति॥

1044. √Śan to sharpen, whet. Pre. शीशांसति। A. शीशांसते। Caus. शानयति॥

डुपचष् १०४५ पाके । पचति—पचते। पेचिथ—पपक्थ। पेचे। पक्ता। पचीष्ट।

1045. √Dupachash to cook, boil. Pre. पचति। A. पचते। Per. पपाच। पेचतुः। पपक्थ or पेचिथ। A. पेचे। I Fut. पक्ता। A. पक्ता। II Fut. पक्ष्यति। A. पक्ष्यते।

Imperative. पचतु । A. पचताम् । Imper. अपचत् । A. अपचत । Pote. पचेत् A. पचेत । Bene. पच्यात् A. पक्षीष्ट । Aorist. अपाक्षीत् । A. अपक्त । अपक्षाताम् । Desi. पिपक्षति or पिपक्षते । Inten. पापच्यते । Yan luk पापक्ति । D. पापक्तः । Past. Part Pass. पक्वः (VIII. 2. 52, S. 3031). Act. पक्ववान् । Nouns. पचः । अपचः । पाकिमम् । पाकः । पचनम् ।

षच १०४६ समवाये । सचति । सचते ॥

1046. √Shacha to be associated with. Pre. सचति । A. सचते । Per. ससाच । सेचतुः । सेचिथ । सेचिव । I Fut. सचिता । II Fut. सचिष्यति । Imper. असचत् । Bene. सच्यात् । Aorist. असचीत् or असाचीत् । (VII. 2. 7. S. 2284). Caus. साचयति । Aorist. असीषचत् । Desi. सिसचिषति । (VIII. 3. 61. S. 2627). Inten. सासच्यते । Yan luk सासक्ति ॥

भज १०४७ सेवायाम् । बभाज । भेजतुः । भेजुः । भेजिथ—बभक्थ । भक्ता । भक्ष्यति । भक्ष्यते । अभाक्षीत् । अभक्त ॥

1047. √Bhaja to serve. Pre. भजति । A. भजते । Per. बभाज । A. भेजे । भेजतुः भेजिथ or बभक्थ । भेजिव । I Fut. भक्ता । A. भक्तासे । II Fut. भक्ष्यति । A. भक्ष्यते । Imperative भजतु । A. भजताम् । Imper. अभजत् । A. अभजत । Poten. भजेत् । A भजेत । Bene. भज्यात् । A. भक्षीष्ट । Aorist अभाक्षीत् । A. अभक्त । अभक्षाताम् । Caus. भाजयति । Aorist अबीभजत् । Desi. बिभक्षति । A. बिभक्षते । Inten. बाभज्यते । Yan luk बाभक्ति । Adj. भजनीया । बिभक्षुः । Nouns :—भागः । भागी । भगिनी । सौभाग्यम् । भक्ता । भक्तिः ॥

रञ्ज १०४८ रागे । नलोपः । रजति—रजते । अराङ्क्षीत्—अरङ्क्त ॥

1048. √Ranj to be dyed or colored. Pre. रजति । A. रजते । The nasal is elided by VI. 4. 26. S. 2397. Per. ररञ्ज । ररञ्जतुः । ररङ्क्थ or ररञ्जिथ । A. ररञ्जिषे । I Fut. रङ्क्ता । A. रङ्क्तासे । II Fut. रङ्क्ष्यति । A. रङ्क्ष्यते । Imperative रजतु । A. रजताम् । Imper. अरजत् । A. अरजत । Poten. रजेत् । A. रजेत । Bene. रज्यात् । A. रङ्क्षीष्ट । Aorist. अराङ्क्षीत् । Dual अराङ्क्ताम् । A. D. अरङ्क्षाताम् । Pl. अराङ्क्षुः । A. अरङ्क्त । Desi रिरङ्क्षति । A. रिरङ्क्षते । Inten रारज्यते । Yan luk रारङ्क्ति । D. राङ्क्तः । Nouns :—रञ्जकः । रञ्जनं । रजनी । रागी । रागः । रंगः । रक्तः । सरजसम् । रजतम् । राजसम् ॥

शप १०४९ आक्रोशे । आक्रोशो विरुद्धानुध्यानम् । शशाप—शेपे । अशाप्सीत्—अशप्त ॥

1049. √Śapa to curse. Pre. शपति । A. शपते । Per. शशाप । शेपतुः । शशप्थ or शेपिथ । A. शेपे । I. Fut. शप्ता । A. शप्तासे । II. Fut. शप्स्यति । Imperative शपतु । A. शपताम् । Imper. अशपत् । A. अशपत । Poten. शपेत् । A शपेत । Bene. शप्यात् । A. शप्सीष्ट । Aorist. अशाप्सीत् । अशाप्ताम् । A. अशप्त । A. अशप्साताम् । Caus. शापयति । Aor. अशीशपत् । Desi. शिशप्सति । Inten. शाशप्यते । Yan luk शाशप्ति । Nouns. शपथ । शपनः । शप्तः ॥

त्विष १०५० दीप्तौ । त्वेषति—त्वेषते । तित्विषे । त्वेक्ष्यति । त्विक्षीष्ट । अत्विक्षत । अत्विक्षाताम् ॥

1050. √Tvish to shine, glitter, blaze. Pre. त्वेषति । A. त्वेषते । Per. तित्वेष । तित्विषतुः । तित्वेषिथ । तित्विषिव । A. तित्विषे । I Fut. त्वेष्टा । A. त्वेष्टासे । II Fut. त्वेक्ष्यति । A. त्वेक्ष्यते । Imperative त्वेषतु । A त्वेषताम् । Imper. अत्वेषत् । A. अत्वेषत । Poten. त्वेषेत् । A. त्वेषेत । Bene. त्विष्यात् । A. त्विक्षीष्ट । Aorist. अत्विक्षत् । अत्विक्षाताम् । A. अत्विक्षत । A. Dual अत्विक्षाताम् । A. Pl. अत्विक्षन्त । Caus. त्वेषयति । Aorist अतित्विषत् । Desi. तित्विक्षति । A. तित्विक्षते । Inten. तेत्विष्यते । Yan luk तेत्वेष्टि । Dual तेत्विष्टः । Nouns. त्विट् । त्वाष्ट्रम् ॥

यज १०५१ देवपूजासंगतिकरणदानेषु । यजति-यजते ॥

1051. √Yaja 1. to worship with sacrifices, 2. to consecrate, 3. to bestow. Thus the Present is यजति or यजते । In forming the Perfect the following sûtra applies:—

२४०८ । लिट्यभ्यासस्योभयेषाम् । ६ । १ । १७ ॥

वच्यादीनां ग्रह्यादीनां चाभ्यासस्य संप्रसारणं स्याल्लिटि । इयाज ॥

2408. There takes place vocalisation of the semivowel of the reduplicate (abhyâsa) of both vachyâdi (VI. 1. 15) and grahâdi (VI 1. 16) words, when the affixes of लिट् follow.

Thus इयाज । In forming the Dual and Plural, the following sûtra applies.

NOTE:—Thus वच—उवाच, उवचिथ, स्वप्-सुष्वाप, सुष्वपिथ, यज—इयाज, इयजिथ, टुवप्-उवाप, उवपिथ । As regards ग्रहादि verbs; ग्रह—जग्राह, जग्रहिथ (there is no speciality in the case of this verb, as these forms would have been evolved without even this rule). ज्या—जिज्यौ, जिज्यिथ, वयि—उवाय, and उवयिथ; व्यध—विव्याध, विव्यधिथ, वश—उवाश, उवशिथ, व्यच्—विव्याच, विव्यचिथ, प्रच्छ—पप्रच्छ and पप्रच्छिथ ॥

This vocalisation of the reduplicate is taught with regard to those affixes which are not कित् । With regard to कित् affixes, the Rule VI. 1. 15 will apply.

२४०९ । वचिस्वपियजादीनां किति । ६ । १ । १५ ॥

वचिस्वप्योर्यजादीनां च संप्रसारणं स्यात्किति । पुनः प्रसङ्गविज्ञानाद्द्वित्वम् । ईजतुः । ईजुः । इयजिथ—इयष्ठ । ईजे । यष्टा । यक्ष्यति । इज्यात् । यक्षीष्ट । अयाक्षीत् । अयष्ट ॥

2409 The semivowels of the roots वच्, स्वप् and यजादि verbs are vocalised when followed by an affix having an indicatory क ॥

Thus यज् + अतुस (which is कित् by I. 2. 5) = इज् + अतुस् = इज् इज्+अतुस् = ईजतुः । The reduplication takes place after vocalisation.

And as the rule of vocalisation is subsequent to that of reduplication in order, therefore by the maxim of परत्व 1. 4. 2, vocalisation will take place first and then reduplication, according to the maxim पुनः प्रसङ्ग विज्ञानात्सिद्धम् "occasionally the formation of a particular form is accounted for by the fact that a preceding rule is allowed to apply again, after it had previously been superseded by a subsequent rule."

NOTE:—The anuvritti of ग्रह does not run into this sûtra. The root वच includes the वच परिभाषणे of the Adâdi class (II. 54) and the वच् substitute of ब्रू (II. 4. 53) स्वप् is the root ञिष्वप् शये of the Adâdi class (II 59). The यजादि verbs are the last nine roots of the Bhvâdi class viz. यज्, वप्, वह्, वस्, वेञ्, व्येञ्, ह्वेञ्, वद् and श्वि ॥ The semivowels of these eleven verbs are changed into the corresponding vowels, when an affix having an indicatory क is added to them. Thus with the Past Participle affixes क्त and क्तवतु we have the following forms:—1. वच्—उक्तः, उक्तवान्, (VIII. 2. 30,) 2 स्वप् = सुप्तः, सुप्तवान् 3 यज्—इष्टः, इष्टवान्, (VIII. 2. 36) 4 वप—उप्तः, उप्तवान्. 5 वह्—ऊढ, ऊढवान् (VIII. 2 31, 40, VIII. 3. 13 and VI. 3. III) 6 वस्-उषितः उषितवान्, (VII. 2. 56 VIII. 3. 60) 7 वेञ्—उतः, उतवान्, 8 व्येञ्—संवीतः, संवीतवान्, 9 ह्वेञ्—हूतः, हूतवान्, 10 वद्—उदितः, उदितवान्, 11 टुओश्वि—शूनः, शूनवान् ॥

1051. √Yaja 1. to worship with sacrifices, 2. to consecrate, dedicate, 3. to bestow. Pre. यजति । A. यजते । Per. इयाज । ईजतुः । इयजिथ or इयष्ठ । ईजिम । I Fut. यष्टा । II Fut यक्ष्यति । A. यक्ष्यते । Imper. यजतु । A. यजताम् । Imper. अयजत् । A. अयजत । Poten यजेत् । A यजेत । Bene. इज्यात् । A. यक्षीष्ट । Aor. अयाक्षीत् । अयाष्टाम् । अयष्ट । A. अयक्षाताम् । Pas. इज्यते । Cause. याजयति । Aorist अयीयजत् । Desi. यियक्षति । A. यियक्षते । Inten. यायज्यते । yaṅluk यायष्टि । Nouns. यागः । यायजूकः । इज्या । यज्ञः । यजुः । यट् । यष्टा । याज्ञिक । यज्वा । ऋत्विक् । इष्टिः ॥

डुवप् १०५२ बीजसंताने । बीजसंतानं क्षेत्रे विकिरणं गर्भाधानं च । अयं छेदनेऽपि । केशान्वपति । उवाप—ऊपे । वप्ता । उप्यात् । वप्सीष्ट । अवाप्सीत्—अवप्त ॥

1052. √Ṭu vap 1. to sow, 2. to beget, produce. The word vija—santâna literally means scattering the seeds—whether the seeds of grain &c. in a field or in the womb. This root also means to cut as केशान् वपति he cuts the hair; Pre. वपति । The preposition नि is changed to णि by VIII. 4. 17 S. 2285, As प्रणिवपति । Per. उवाप । A. ऊपे । उवप्थ or उवपिथ । ऊपिम । I Fut. वप्ता । Imper. वपतु । Bene. उप्यात् । A. वप्सीष्ट । Nouns. वापी । वापिः । वप्रः ।

वह १०५३ प्रापणे । उवाह । उवहिथ । 'सहिवहोरोदवर्णस्य' (२५५७) उवोढ—ऊहे । वोढा । वक्ष्यति । अवाक्षीत् । अवोढाम् । अवाक्षुः । अवोढ । अवक्षाताम् । अवक्षत । अवोढाः । अवोढ्वम् ॥

1053. √Vaha to carry, to convey. Pre, वहति । A. वहते । Per. उवाह । ऊहतुः । उवहिथ । उवोढ । ऊहिव । A. ऊहे । ऊहिवे । I Fut. वोढा । II Fut. वक्ष्यति । A वक्ष्यते । Imperative वहतु । A. वहताम् । with प्र we have प्रवहाणि । Imper. अवहत् । A अवहत । Poten. वहेत् । A. वहेत । Bene. उह्यात् । A. वक्षीष्ट । Aorist. अवाक्षीत् । D अवोढाम् । Pl. अवाक्षुः । A. अवोढ । D. अवक्षाताम् । A. Pl. अवक्षत । A. 2 S. अवोढाः । A. Pl. अवोढ्वम् । A. 1. S. अवक्षि । Cond. अवक्ष्यत् । Pas. उह्यते । Caus. वाहयति । Aorist अवीवहत् । Desi. विवक्षते । Inten. वावह्यते । Yaṅ luk वावोढः वावहति । Nouns:—ऊढः । ऊढिः Marriage. अपोढः । प्रौढः । वहः । वधूः । अनडुही ॥

वस १०५४ निवासे । परस्मैपदी । वसति । उवास ॥

1054. √Vasa to dwell.

This root is Parasmaipadi. The present is वसति । The Perfect 3rd S. is उवास । In the dual the स is changed to ष by the following sûtra.

२४१० । शासिवसिघसीनां च । ८ । ३ । ६० ॥

इण्कुभ्यां परस्यैषां सस्य षः स्यात् । ऊषतुः । ऊषुः । उवसिथ—उवस्थ । वस्ता । 'सः स्यार्धधातुके' (२३४७) वत्स्यति । उष्यात् । अवात्सीत् । अवात्ताम् ॥

2410. The ष is substituted for the स of शास्, वस् and घस् when it is preceded by an इण् vowel or a guttural.

Note:—Thus अन्वशिषत्, अन्वशिषताम्, अन्वशिषन्, the Aorist of शास्; the च्लि is replaced by अङ् (III. 1. 56), and the आ changed to इ by VI. 4. 34. So also शिष्टः, शिष्टवान् । From वस् उषितः, उषितवान्, उषित्वा । The Samprasârana takes place by VI. 1. 15 as it belongs to Yajâdi class. From घस् we have जक्षतुः, जक्षुः in the Perfect. घस् is the substitute of अद् (II. 4. 30), the penultimate अ is elided by

VI. 4. 98. So also अक्षन् in अक्षन्नमीमदन्त पितरः (Rig. I. 82. 2). This is the Aorist form of अद् the घस् is substituted for अद् (II. 4. 37): the Aorist sign is elided by II. 4. 80.

Thus ऊषतुः । Pl. ऊषुः । 2nd. S. उवसिथ or उवस्थ । The First Future is वस्ता । The second Future is thus formed वस्+स्यति । Here the स् of √वस् is changed to त् by VII. 4. 49. S. 2342. We have therefore, वत्स्यति । The Benedictive is उष्यात् । The aorist is अवात्सीत् । अवात्ताम् ॥

1054. √Vasa to live, to dwell Pre. वसति । Per. उवास । ऊषतुः । उवसिथ or उवस्थ । ऊषिव । I Fut. वस्ता । II Fut. वत्स्यति । Imperative वसतु । Imper. अवसत् । Bene. उष्यात् । Aorist. अवात्सीत् । अवात्ताम् । अवात्सुः । Caus. वासयति । Aorist अवीवसत् । Desi. विवत्सति । Inten. वावस्यते । Yaṅ luk वावस्ति । Imperfect अवावत् । Past. Part. Pass. उषितः । Act. उषितवान् । Ger. उषित्वा । Nouns. वास्तव्यः । अमावस्यम् । आवासी । प्रवासी । वत्सरः । वसतिः । वसन्तः । वासं । वस्तिः । वस्त्रम् । वासिः । वसुः । वसिष्ठः ॥

वेञ् १०५५ तन्तुसंताने । वयति-वयते ॥

1055. √Veñ to weave.

The Present is वयति । A. वयते । In the Perfect √वे is replaced optionally by √वय by the following sûtra.

२४११ । वेञो वयिः । २ । ४ । ४१ ॥

वा स्याल्लिटि । इकार उच्चारणार्थः । उवाय ॥

2411. When लिट् follows, वयि is optionally the substitute of वेञ् 'to weave.'

The इ in वयि is for the sake of pronunciation only. The substitute is वय । Thus वय + णल् = वय् + वय् + अ (VI. 1. 8. S. 2177) = उय् + वय् + अ (VI. 1. 17. S. 2408) = उवाय । In the dual we have वय + अतुः = उय् + अतुः ॥

The dual affix अतुस् being कित् (I. 2. 5) the following sûtra would have applied and caused the vocalisation of य्; but it is not so by the sûtra that follows, namely S. 2413.

२४१२ । ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च । ६ । १ । १६ ॥

एषां किति ङिति च संप्रसारणं स्यात् । यकारस्य प्राप्ते ॥

2412. There is vocalisation of the semi-vowels of the following verbs, when an affix having an indicatory क् or ङ् follows:—ग्रह 'to take', ज्या 'to become old', वेञ् 'to weave', व्यध 'to strike', वश 'to shine', व्यच 'to deceive', व्रश्च 'to cut,' प्रच्छ 'to ask', and भ्रस्ज 'to cook, to fry.'

The य required vocalisation, which is however prevented by

२४१३ । लिटि वयो यः । ६ । १ । ३८ ।

वयो यस्य संप्रसारणं न स्याल्लिटि । ऊयतुः । ऊयुः ।

2413. In the substituted root वय (II. 4. 41), the य in the Perfect is not vocalised.

The phrase सम्प्रसारणं is understood here. Thus उवाय ऊयतुः, ऊयुः । The word लिट् is employed in this aphorism for the sake of subsequent sûtras, this one could have done well without it even.

Though the य is not vocalised, it is optionally replaced by व by the following sûtra.

२४१४ । वश्चास्यान्यतरस्यां किति । ६ । १ । ३९ ॥

वयो यस्य वो वा स्यात्किति लिटि । ऊवतुः । ऊवुः । वयस्तासत्वभावात्थलि नित्यमिट् । उवयिथ । स्थानिवद्भावेन ङित्वात्तङ् । ऊये । ऊवे । वयादेशाभावे ॥

2414. Before the tense-affixes of the Perfect that have an indicatory क (I. 2. 5), for the य् of वय् may optionally be substituted a व् ॥

Thus ऊयतुः or ऊवतुः, ऊवुः or ऊयुः ॥

NOTE:—According to Pâtanjali, the phrase वश्चास्य of this sûtra could have been dispensed with; this much would have been enough:—अन्यतरस्यां किति वेञः । Thus वे + अतुस् = वा + वा + अतुस् = ववतुः and ववुः (the vocalisation being prohibited). In the alternative:—वा + अतुस् = उ + अतुस् = उ + उवङ् + अतुस् (VI. 1. 77) = ऊवतुः, ऊवुः ॥ Here there is vocalisation. In the case of वय् substitute, the य is never vocalised, so we have ऊयतुः, ऊयुः । Thus all the three forms have been evolved without using वश्चास्य ॥

In the 2nd S. there is always इट् augment, in spite of VII. 2. 62, S. 2295, because √वय is defective and can never be conjugated in the First Future with तास् । Thus we have उवयिथ ॥

The defective root वय being the substitute of वेञ् is considered to have an indicatory ञ् by I. 1. 56. S. 49 and so is conjugated in the Parasmai and Atmane both. Thus Atmane—Perfect is ऊये or ऊवे ॥

When there is no वय substitution for वे in the Perfect, the following sûtra applies.

२४१५ । वेञः । ६ । १ । ४० ॥

वेञो न संप्रसारणं स्याल्लिटि । ववौ । ववतुः । ववुः । वविथ-ववाथ । ववे । वाता । ऊयात् । वासीष्ट । अवासीत् ॥

2415. The semivowel of वे 'to weave' is not vocalised in the Perfect.

Thus ववौ, ववतुः, ववुः । This root belongs to यजादि class and would have been vocalised before कित् affixes by VI. 1. 15; and before non-कित् affixes the Reduplicate syllable of the Perfect would have been vocalised by VI. 1. 17. Both vocalisations are prohibited here.

1055. √Veñ to weave. Pre. वयति । A. वयते । Per. उवाय or ववौ । Dual. ऊयतुः or ऊवतुः । ऊयुः or ऊवुः । 2nd S. उवयिथ । ऊयथुः । ऊय । उवाय or उवय । ऊयिव । ऊयिम । A. ऊये । A. ऊयाते । A. ऊयिढ्वे or ध्वे । A. ऊयिवहे । I Fut. वाता । A. वाता । II Fut. वास्यति । A. वास्यते । Imperative. वयतु । A. वयताम् । Imper. अवयत् । A. अवयत । Pote. वयेत् । A. वयेत । Bene. ऊयात् । A. वासीष्ट । Caus. वाययति । Aorist अवीवयत् । Desi. विवासति । A. विवासते । Inten. वावायते । Yañ luk वावाति or वावेति । वावोतः । वावति । Imperative वावीहि । Adj. वानीयः । वायः । Noun :—तन्तुवायः ॥

व्येञ् १०५६ संवरणे । व्ययति ॥

1056. √Vyeñ to cover.

The Present is व्ययति । In the Perfect, the sûtra VI. 1. 45. S. 2370 required the ए to be changed into आ; but the following sûtra prevents that.

२४१६ । न व्यो लिटि । ६ । १ । ४६ ॥

व्येञ आत्वं न स्याल्लिटि । वृत्तिः । परमपि हलादिःशेषं बाधित्वा यस्य सम्प्रसारणम् । उभयेषां ग्रहणसामर्थ्यात् । अन्यथा वच्यादीनां ग्रहादीनां चानुवृत्त्यैव सिद्धे किं तेन । विव्याय । विव्यतुः । विव्युः । 'इडत्यर्ति—' (२३८४) इति नित्यमिट् । विव्ययिथ । विव्याय—विव्यय । विव्ये । व्याता । वीयात् । व्यासीष्ट । अव्यासीत् । अव्यास्त ॥

2416. There is not the substitution of आ for the Diphthong of the root व्ये when the affixes of the Perfect follow.

Thus संविव्याय, संविव्ययिथ । The reduplicate of the Perfect is vocalised here by VI. 1. 17. The Vriddhi in संविव्याय takes place by VII, 2. 115 before the णित् affix णल् ॥

Though in the reduplicate, the य् required to be elided by VII. 4. 60. S. 2179 because it is subsequent to the rule of samprasâraṇa ; yet the latter prevails and the य is vocalised to इ । (Had VII. 4. 60. S. 2179 applied then the vocalisation would have been of व ।) This we do, because of the word ubhayeshâm being used in the sûtra VI. 1. 17. S. 2408. For there was no necessity of using this word in the sûtra VI. 1. 17, S. 2408, as the anuvṛitti of Vachyâdi and grâdi was already current in it.

Though the phrase उभयेषाम् could have been supplied into this sûtra by the context and the governing scope of the preceding sûtras, its express mention in this sûtra is for the sake of indicating, that the rule of vocalisation supersedes even the rule of हलादिः शेषः VII. 4. 60, the vocalisation must take place at all events. Thus व्ये + णल् = व्ये + व्ये + अ । Here by VII. 4. 60, the second consonant य of व्ये ought to have been elided, and the equation would have stood वे + व्ये + अ and there would have been vocalisation of व by VI. 1. 17. S. 2408. But that is not intended. There is vocalisation of य and we have विव्याय । In fact the universal maxim of vocalisation is :—" The samprasâraṇa and the operation dependent on it possess greater force than other operations which are simultaneously applicable."

1056. √Vyeñ to cover. Pre. व्ययति । A. व्ययते । Per. विव्याय । A. विव्ये । विव्यतुः । A. विव्याते । विव्युः । विव्ययिथ । A. विव्यिषे । A. विव्यिध्वे or विव्यिढ्वे । विव्याय । A. विव्ययवहे । I Fut. व्याता । A. व्याता । II Fut. व्यास्यति । A. व्यास्यते । Imperative व्ययतु । A. व्ययताम् । Imper. अव्ययत् । A. अव्ययत । Poten. व्ययेत् । A. व्ययेत । Bene. वीयात् । A. व्यासीष्ट । Aorist अव्यासीत् । अव्यासाताम् । A. अव्यास्त । Caus. व्याययति । Desi. विव्यासति । A. विव्यासते । Inten. वेवीयते । Yañ luk वाव्येति or वाव्याति । Dual वाव्यीतः । Plural. वीव्यति । Adj. व्यानीय । व्यायम् । व्यातव्यम् । Noun.—वीतिः ॥

ह्वेञ् १०५७ स्पर्धायां शब्दे च ।

1057. √Hveñ . To emulate, to call by name.

The following sûtra applies in forming its Perfect.

२४१७ । अभ्यस्तस्य च । ६ । १ । ३३ ॥

अभ्यस्तीभविष्यतो ह्वेञः संप्रसारणं स्यात् । ततो द्वित्वम् । जुहाव । जुहुवतुः । जुहुवुः । जुहोथ or जुहविथ । जुहुवे । ह्वाता । हूयात् । ह्वासीष्ट ॥

2417. There is vocalisation of the semivowel of ह्वा in the reduplicated form, in both the syllables.

NOTE :—The abhyasta means the reduplicate and the reduplicated, both the syllables. The vocalisation takes place before reduplication. Thus जुहाव, जोहूयते,

and जुहुवति । This and the last sûtra are one, in the original of Pânini, they have deen divided into two by the authority of a Vârtika.

The root ह्वे is vocalised *first* and then reduplicated. In other words, when such an affix follows which will cause reduplication, then ह्वे becomes हु by vocalisation first, and it is reduplicated afterwards. For the purposes of reduplication हु is the proper stem. Thus जुहाव, Dual जुहुवतुः, (VI. 4. 77 S. 271) Pl. जुहुवुः । 2nd S. जुहोथ or जुहविथ । Atm. 3. S. जुहुवे । First Future ह्वाता । Ben. हूयात् । A. ह्वासीष्ट ॥

In forming the Aorist the following applies.

२४१८ । लिपिसिचिह्वश्च । ३ । १ । ५३ ॥

च्लेरङ् स्यात् ॥

2418. After the verbs लिप् 'to paint,' सिच् 'to sprinkle' and ह्वे "to call,' अङ् is the substitute of च्लि when लुङ् follows signifying the agent.

Note :—Thus अलिपत् 'he painted or wrote'; असिचत् 'he sprinkled'; and आह्वत् 'he called or challenged.'

But there is option in the âtmanepada.

२४१९ । आत्मनेपदेष्वन्यतरस्याम् । ३ । १ । ५४ ॥

आतो लोपः । अह्वत । अह्वेताम् । अह्वन्त । अह्वत । अह्वास्त ॥

2419. After the verbs लिप्, सिच् and ह्वे, अङ् is optionally the substitute of च्लि, when the affixes of the Atmanepada follow.

Thus (अलिपत or अलिप्त 'he painted'; असिचत or असिक्त 'he sprinkled';) अह्वत or अह्वास्त 'he challenged.' There is elision of आ by VI. 4. 44. S. 2372.

1057. √ Hveñ 1. To vie with, emulate 2. To call by name. Pre. ह्वयति । A. ह्वयते । Per. जुहाव । A. जुहुवे । जुहुवतुः । A. जुहुवाते । जुहविथ (by guna of उ) or जुहोथ । A. जुहुविषे । A. जुहुविध्वे or ढ्वे । I Fut. ह्वाता । A. ह्वातासे । II Fut. ह्वास्यति । A. ह्वास्यते । Imperative. ह्वयतु । A. ह्वयताम् । Imper अह्वयत् । Poten. ह्वयेत् । Bene. हूयात् । A. ह्वासीष्ट । Aorist. अह्वत् । अह्वताम् । A. अह्वत । A. अह्वेताम् । A. अह्वन्त । Or. अह्वास्त । A. अह्वासाताम् । A. अह्वासत । Caus. ह्वाययति । Aor. अजूहवत् । Dual. अजूहवताम् । अजूहवन् । *Nouns* :—आहुः । निहवः । विहवः । आह्वायः । आह्वा । आहूतिः । संहूतिः ॥

अथ द्वौ परस्मैपदिनौ ॥

वद् १०५८ व्यक्तायां वाचि । वदति । उवाद । ऊदतुः । उवदिथ । वदिता । उद्यात् । 'अतहल' (२२६७) इति वृद्धिः । अवादीत् ॥

The next two roots are Parasmaipadî.

1058. √ Vada to speak distinctly. Pre. वदति । Per. उवाद । ऊदतुः । ऊदुः । उवदिथ । उवाद or उवद । ऊदिव । I Fut. वदिता । II Fut. वदिष्यति । Imperative वदतु । Imper. अवदत् । Poten. वदेत् । Bene. उद्यात् । Aorist. अवादीत् । Here the vriddhi is by VII. 2. 3. S. 2267. Caus. वादयति । Aorist. अवीवदत् । A. वादयते । Aorist. अवीवदत । Desi. विवदिषति । Inten. वावद्यते । Yañ luk वावदीति or वावत्ति । *Nouns* :—वदनम् । प्रवादी । विवंद । परिवादी । वदंवदः । वादिः । वावदूकः । परिवादकः ॥

टुओश्वि १०५९ गतिवृद्ध्योः । श्वयति ॥

1059. √ Ṭuośvi 1. to go, 2. increase.

The Present is श्वि+शप्+ति = श्वयति । In the Perfect there is vocalisation optionally by the following.

२४२० । विभाषा श्वेः । ६ । १ । ३० ॥

श्वयतेः संप्रसारणं वा स्याल्लिटि यङि च । शुशाव । शुशुवतुः । श्वयतेर्लिट्यभ्यासस्य प्रतिषेधः । तेन 'लिट्यभ्यासस्य–' (२४०८) इति संप्रसारणं न । शिश्वाय । शिश्वियतुः । श्वयिता । श्वयेत् । शूयात् । 'जॄस्तम्भु–' (२२९१) इत्यङ् वा ॥

2420. There is optionally the vocalisation of the semivowel of श्वि before the affixes of the Perfect and the Intensive.

The phrases लिड् यङोः and सम्प्रसारणं are to be read into this sûtra. Thus शुशाव । श्वि + णल् = (श् उइ+णल् VI. 1. 30) = शु + णल् (VI. 1. 108) = शु + शु + अ (VI. 1. 8) = शुशाव । (with vriddhi). Or शिश्वाय, शुशुवतुः or शिश्वियतुः । So also in the Intensive as शोशूयते or शेश्वीयते । The root श्वि would not have taken vocalisation before यङ् by any previous rule, this sûtra teaches optional vocalisation. The root would have taken vocalisation before लिट्, which is a कित् affix, invariably by VI. 1. 15, this sûtra modifies that by making the substitution optional.

Vârtika :—In the alternative, when the root does become vocalised, the reduplicate is also not vocalised in spite of VI. 1. 17. This explains the form शिश्वाय, which by VI. 1. 17 would have been शुश्वाय ॥

The aorist is optionally formed by अङ् (III. 1. 58. S. 2291) when the aorist is formed by अङ्, the following sûtra applies.

२४२१ । श्वयतेरः । ७ । ४ । १८ ॥

श्वयतेरिकारस्याकारः स्यादङि । पररूपम् । अश्वत् । अश्वताम् । अश्वन् । 'विभाषा धेट्श्व्योः' (२३१५) इति चङ् । इयङ् । अशिश्वियत् । 'ह्म्यन्त–' (२२९९) इति न वृद्धिः । अश्वयीत् । यत् । यजादयो वृतः । भ्वादिराकृतिगणः । तेन चुलुम्पतीत्यादिसंग्रहः ॥

2421. The अ is substituted for the final of श्वि in the अङ् Aorist.

As अश्वत्, अश्वताम्, अश्वन् । For the अ of the stem and the अ of the affix there is the single substitute of the last by VI. 2. 97. See III. 1. 58.

Optionally the Aorist is formed by reduplication (चङ्) by III. 1. 49. S. 2375. Thus अशिश्वियत् । Here there is इयङ् substitution by VI. 4. 77. S. 271, as it is antaranga and therefore stronger than guṇa.

When the ordinary aorist is formed with सिच्, then by VII. 2. 5. S. 2299 there is no Vṛiddhi and we get the form अश्वयीत् ॥

• वृत् 'End.' Here end the yajadi roots.

The Bhuâdi class is an Akritigaṇa. All roots not otherwise classified, fall under this class. As चुलुम्पति &c.

1059. √ Ṭuośvi 1. to go. 2. to increase. Pre. श्वयति । Per. शुशाव । शुशुवतुः । शुशुवुः । शुशविथ । शुशुवथुः । शुशुव । or शुशाव । शुशुविव । शुशुविम । शिश्वाय । शिश्वियतुः । शिश्वियुः । शिश्वयिथ । शिश्वियथुः । शिश्वाय or शिश्वय । शिश्वियिव । शिश्वियिम । I Fut. श्वयिता । II Fut. श्वयिष्यति । Imperative श्वयतु । Imper. अश्वयत् । Poten श्वयेत् । Bene. शूयात् । Aorist, अश्वयत् । अशिश्वियत् । अशिश्वियताम् । अशिश्वियन् । अशिश्वियः । अशिश्वियतम् । अशिश्विय । अशिश्वियाव । अश्वयीत् । अश्वयिष्टाम् । Desi. शिश्वयिषति । Inten. शेश्वीयते, शोशूयते, । Yaṅ luk शेश्वयीति or शेश्वेति । Dual. शेश्वितः । Pl. शेश्वियति । Past. Part. Passive शूनः । Act. शूनवान् । Nouns:—श्वयथुः । श्वन् 'dog.' । श्वापदः ॥

इति तिङन्तभ्वादिप्रकरणम् ॥ Here ends the conjugation of roots belonging to the Bhvâdi class.

-:0:-

CHAPTER II.

अथ तिङन्तादादिप्रकरणम् ।

THE ADÂDI VERBS (72)

Before we take up the conjugation of the regular roots commencing with अद् to ....; we shall show the conjugation of the sautra root ऋति, which is treated like the roots of this class.

२४२२ । ऋतेरीयङ् । ३ । १ । २९ ॥

ऋतिः सौत्रस्तस्मादीयङ् स्यात्स्वार्थे । 'जुगुप्सायामयं धातुः' इति बहवः । 'कृपायाम्' इत्येके 'सनाद्यन्ताः'–(२३०४) इति धातुत्वम् । ऋतीयते । ऋतीयांचक्रे आर्धधातुकविवक्षायां तु 'आयादय आर्धधातुके वा' (२३०५) इतीयङभावे 'शेषात्कर्तरि–' (२१५९) इति परस्मैपदम् । आनर्त । अर्तिष्यति । आर्तीत् ॥

2422. The affix ईयङ् comes after the sûtra root ऋति 'to reproach' without changing the sense.

NOTE—The indicatory ङ् shows that the verb will take the affixes of the Atmanepada ; as ऋतीयते 'he pities or reproaches'; so also, ऋतीयाते, ऋतीयन्ते ॥

Many say that the meaning of this root is 'to reproach. But others say it means 'to pity. The whole form ऋतीय gets the designation of dhâtu and is called 'root,' by S. 2304.

Thus the Preent is ऋतीयते, the Perfect is ऋतीयांचक्रे ॥

The addition of ईयङ् is optional when the affix of the Ardhadhâtuka follows (S. 2305). So when the ईयङ् is not added, the root is Parasmaipadi by the universal sûtra 2159. Thus another from of the Perfect is आनर्त ॥

The Future in अर्तिष्यति । The Aorist is आर्तीत् ॥

Pre. ऋतीयते । Per. ऋतीयांचक्रे or आनर्त । I Fut. ऋतीयिता । अर्तिता II Fut. ऋतीयिष्यति । अर्तिष्यति । Aorist. आर्तीयिष्ट । आर्तीत् ॥

अद् भक्षणे । द्वौ परस्मैपदिनौ ॥

Now we take up the conjugation of the root अद 'to eat.' This and the next root are parasmaipadii. The vikaraṇa शप् is elided by the following:—

२४२३ । अदिप्रभृतिभ्यः शपः । २ । ४ । ७२ ॥

लुक् स्यात् । अत्ति । अत्तः । अदन्ति ॥

2423. After the verb अद् 'to eat' and the rest, there is luk elision of the Vikaraṇa शप् (III. 1. 68).

Thus अद्+शप्+ति = अत्ति 'he eats'; हन्ति 'he kills'; द्वेष्टि 'he envies.' The Adâdi verbs belong to the second conjugation. In this class of verbs, therefore, the terminations are added direct to the root.

लट् PERSENT.

	Singular.	*Dual.*	*Plural.*
Third Person.	अत्ति ।	अत्तः ।	अदन्ति ।
Second Person.	अत्सि ।	अत्थः ।	अत्थ ।
First. Person.	अद्मि ।	अद्वः ।	अद्मः ॥

—:o:—

In forming the Perfect, the following sútra applies.

२४२४ । लिट्यन्यतरस्याम् । २ । ४ । ४० ॥

अदो घस्लृ वा स्याल्लिटि । जघास 'गमहन-'(२३६३) इत्युपधालोपः । तस्य अचिविधि इति स्थानिवद्भावनिषेधात् चर्त्वम् । 'शासिवसि-'(२४१०) इति षत्वम् । जक्षतुः । जक्षुः । घसेः क्रादिनियमात्प्राप्ति नित्यमिट् । जघसिथ । आद । आदतुः । 'इडत्यर्ति-'(२३८४) इति नित्यमिट् । आदिथ । अत्ता । अत्स्यति ॥

2424. When लिट् (Perfect) follows घस्लृ is optionally the substitute of अद्.

जघास or आद 'he ate,' जक्षतुः or आदतुः 'they two ate,' जक्षुः or आदुः 'they all ate.' The word जक्षतुः is thus formed :—घस् + अतुस् = घस् + घस् + अतुस् (VI. 1. 8) = घ + घस् + अतुस् (VII. 4. 60) = झ + घस् + अतुस् (VII. 4. 62) = ज + घस् + अतुस् (VIII. 4. 53) = ज + घ्स् + अतुस् = (VI. 4. 98) = जक्षतुः (VIII. 3. 60). The penultimate अ of घस् is elided by S. 2363; this lopa being considered as not sthânivat for the purposes of the application of चर्विधि, the घ is changed to क by खरि च । See I. 1. 57. The स is changed to ष by S. 2410.

The Second Person Sing. is जघसिथ the augment इट् is Nitya and not optional, because √Ghas being a Defective verb has no First Future (लुट्) See S. 2294 to 2296.

PERFECT.

	Singular.	*Dual.*	*Plural.*
Third Per.	जघास ।	जक्षतुः ।	जक्षुः ।
Second Per.	जघसिथ ।	जक्षथुः ।	जक्ष ।
First Per.	जघास or जघस ।	जक्षिव ।	जक्षिम ॥

—:o:—

Third Per.	आद ।	आदतुः ।	आदुः ।
Second Per.	आदिथ । (The इट् is compulsory S. 2384).	आदथुः ।	आद ।
First Per.	आद ।	आदिव ।	आदिम ॥

लुट् I. FUTURE.

	Singular.	*Dual.*	*Plural.*
Third Person.	अत्ता ।	अत्तारौ ।	अत्तारः ।
Second Person.	अत्तासि ।	अत्तास्थः ।	अत्तास्थ ।
First Person.	अत्तास्मि ।	अत्तास्वः ।	अत्तास्मः ॥

लृट् II. FUTURE.

Third Person.	अत्स्यति ।	अत्स्यतः ।	अत्स्यन्ति ।
Second Person.	अत्स्यसि ।	अत्स्यथः ।	अत्स्यथ ।
First Person.	अत्स्यामि ।	अत्स्यावः ।	अत्स्यामः ॥

In the Imperative the follwing sûtra applies.

२४२५ । हुझल्भ्यो हेर्धिः । ६ । ४ । १०१ ॥

होर्झलन्तेभ्यश्च हेर्धिः स्यात् । अद्धि । अत्तात् । अदानि ॥

2425. After हु and after a consonant (with the exception of semi-vowels and nasals), धि is substituted for the Imperative affix हि, when the latter does not take the augment इट् ॥

Thus अद्+हि=अद्+हि=अद्+धि=अद्धि ॥

लोट् IMPERATIVE.

	Sing.	*Dual.*	*Plural.*
Third Person.	अत्तु or अत्तात् ।	अत्ताम् ।	अदन्तु ।
Second Person.	अद्धि or"	अत्तम् ।	अत्त ।
First Person.	अदानि ।	अदाव ।	अदाम ।

—:o:—

Informing the Imperfect, the following sûtra applies.

२४२६ । अदः सर्वेषाम् । ७ । ३ । १०० ॥

अदः परस्यापृक्तसार्वधातुकस्याडागमः स्यात् सर्वमतेन । आदत् । आत्ताम् । आदन् । आदः आत्तम् । आत्त । आदम् । आद्व । आद्म । अद्यात् । अद्याताम् अद्युः । अद्यास्ताम् । अद्यासुः ॥

2426. After अद् 'to eat', comes the augment अट् before a Sârvadhâtuka affix consisting of a single consonant, according to the opinion of all grammarians.

As आदत् and आदः । Before a non-aprikta we have अत्ति, अत्सि । The word सर्वेषाम् makes it a necessary rule and not optional, like the last Ashṭâdhyâyî rule VII, 3. 99.

लङ् । IMPERFECT.

	Sing.	*Dual.*	*Plural.*
Third Person.	आदत् ।	आत्ताम् ।	आदन् ।
Second Person.	आदः ।	आत्तम् ।	आत्त ।
First Person.	आदम् ।	आद्व ।	आद्म ।

लिङ् । POTENTIAL.

Third Person.	अद्यात् ।	अद्याताम् ।	अद्युः ।
Second Person.	अद्याः ।	अद्यातम् ।	अद्यात ।
First Person.	अद्याम् ।	अद्याव ।	अद्याम ।

आशीर्लिङ् । BENEDICTIVE.

Third Person.	अद्यात्	अद्यास्ताम्	अद्यासुः ।

Second Person.	अद्याः ।	अद्यास्तम् ।	अद्यास्त ।
Fist Person.	अद्यासम् ।	अद्यास्व ।	अद्यास्म ।

In the Aorist, the following rule applies.

२४२७ लुङ्सनोर्घसॢ । २ । ४ । ३७ ॥

अदो घसॢ स्याल्लुङि सनि च । ऌदित्वादङ् । अघसत् ॥

2427. When luṅ (aorist) or san (desiderative) follows, घसॢ is the substitute of अद् 'to eat.'

Thus :—अघसत्, अघसताम्, अघसन् 'he ate'. The ॢ in घसॢ is servile and indicates the substitution of अङ् for च्लि of the Aorist. (III. 1. 55.) So also in the Desiderative, as जिघत्सति, जिघत्सतः, जिघत्सन्ति 'wishes to eat.

Note :—The verb अद् is replaced by घस् when the affix, अच् follows, प्र + अद् + अच् = प्र घस् + अच् = प्रघसः 'voracious.'

AORIST.

	Sing.	*Dual.*	*Plural.*
Thir dPerson.	अघसत् ।	अघसताम् ।	अघसन् ।
Second Person.	अघसः ।	अघसतम् ।	अघसत ।
First Person.	अघसम् ।	अघसाव ।	अघसाम ॥

1. √ Ad. 'to eat.'

Pre. अत्ति । अत्तः । अदन्ति अत्सि । अत्थः । अत्थ । अद्मि । अद्वः । अद्मः । Per. जघास or आद । जक्षतुः or आदतुः । जक्षुः or आदुः । जघसिथ or आदिथ । जक्षथुः or आदथुः । जक्ष or आद । जघास or जघस । जक्षिव or आदिव । जक्षिम or आदिम । I Fut. अत्ता । अत्तारौ । अत्तारः । अत्तासि । अत्तास्थः । अत्तास्थ । अत्तास्मि । अत्तास्वः । अत्तास्मः । II Fut. अत्स्यति । अत्स्यतः । अत्स्यन्ति । अत्स्यसि । अत्स्यथः । अत्स्यथ । अत्स्यामि । अत्स्यावः । अत्स्यामः । Imperative, अत्तु or अत्तात् । अत्ताम् । अदन्तु । अद्धि । अत्तम् । अत्त । अदानि । अदाव । अदाम । Imper. आदत् । आत्ताम् । आदन् । आदः । आत्तम् । आत्त । आदम् । आद्व । आद्म । Poten. अद्यात् । अद्याताम् । अद्युः । अद्याः । अद्यातम् । अद्यात । अद्याम् अद्याव । अद्याम । Bene. अद्यात् । अद्यास्ताम् । अद्यासुः । अद्याः । अद्यास्तम् । अद्यास्त । अद्यासम् । अद्यास्व । अद्यास्म । Aorist. अघसत् । अघसताम् । अघसन् । अघसः । अघसतं । अघसत । अघसम् । अघसाव । अघसाम । Cond. आत्स्यत् । आत्स्यताम् । आत्स्यन् । आत्स्यः । आत्स्यतम् । आत्स्यत । आत्स्यम् । आत्स्याव । आत्स्याम । Pass. अद्यते । Caus. आदयति । Aor. आदिदत् । Desi. जिघत्सति । Pre. part. Parasmai. अदन् । अदती । Past Part Pass. जग्धः । Ger. जग्ध्वा । Infini. अत्तुम् । Nouns. अदनम् । अदनम् ॥

हन २ हिंसागत्योः । प्रणिहन्ति ॥

2. √ Hana. To kill, to go.

Now we take up the conjugation of हन् 'to kill' 'to go', Thus the 3rd Person Singluar हन्ति with the preposition, प्रणिहन्ति । The न is changed to ण by VIII. 4. 17.

In forming the dual, we have हन् + तस् । Now applies the following sûtra:—

२४२८ । अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति । ६ । ४ । ३७ ॥

'अनुनासिक-' इति लुप्तषष्ठीकं पदम् । अनुनासिकान्तानामेषां वनतेश्च लोपः स्याज्झलादौ क्ङिति परे । यमिरमिनमिगमिहनिमन्यतयोऽनुदात्तोपदेशाः । तनुक्षणुक्षिणुऋणुतृणुघृणुवनुमनुतनोत्यादयः । हतः । घ्नन्ति ॥

2428. The final nasal of those roots which in the Dhâtupâṭha have an unaccented root-vowel, as well as of वन and तन &c., is elided before an affix beginning with a consonant (except a semi-vowel or nasal), when these have an indicatory क् or ङ् ॥

NOTE :—Thus यम् gives us यत्वा (with क्त्वा), यतः (with क्त , यतवान् (with क्तवतु), यतिः (with क्तिन्). Similarly रम् gives us रत्वा, रतः, रतवान्, रतिः । यम्, रम्, नम्, गम्, हन् and मन् which end in a nasal are to be considered as unaccented roots, though taught as accented in the Dhâtupâṭha. So also of वन्: *i.*, *e.*, वतिः with क्तिन्, with क्तिच् the nasal is not elided as वन्ति (VI. 4. 39); and before other jhalâdi affixes व, retains न् as all those affixes take the augmet इट् । The तनादि roots belong to the eighth class. Thus ततः, ततवान् । The Tanâdi roots are ten in number, तन् सन्, क्षण्, क्षिण्, ऋण्, तृण्, घृण्, वन्, मन् and कृञ् । Of these सन् takes long आ also (VI. 4. 45) क्षण्...क्षतः, क्षतवान्, क्षिण्...क्षितः, क्षितवान् ; तृण्...तृतः, तृतवान् ; घृण्...घृतः, घृतवान् ; वन्... वतः, वतवान् ; मन्...मतः, मतवान् ॥

The word अनुनासिकस्य is in the genitive case the sign of the genitive being suppressed. This qualifies all but one word वनति of the sûtra. The roots √Yam, √Kam, √Nam, √Gam, √Han and √Manya are taught as Anudâtta. The Tanâdi roots are √Tan, √Kshaṇ, Kshiṇ √Riṇ, √Tṛiṇ, √Ghṛiṇ, √Van, and √Man. Thus हन् + तः = ह+0+तः = हतः ॥

The Third Person Plural is formed thus:—हन् + अन्ति = ह्न् + अन्ति (VI. 4. 98 S. 2363) = घ्न् + अन्ति(VII. 3. 54. S. 358) = घ्नन्ति ॥

When an alterant upasarga is added, the न is changed to ण by the following Sûtra.

२४२९ । वमोर्वा । ८ । ४ । २३ ॥

उपसर्गस्थान्निमित्तात्परस्य हन्तेर्नस्य णो वा स्याद्वमयोः परयोः । प्रहण्मि–प्रहन्मि । प्रहण्वः— प्रहन्वः । हो हन्तेः – (३५८) इति कुत्वम् । जघान । जघ्नतुः । जघ्नुः ॥

2429. Optionally when व or म follows, the न of √*han* is changed to ण, when preceded by an upasarga competent to cause change.

Thus प्रहण्वः, परिहण्वः, or प्रहन्वः and परिहन्वः, प्रहण्मः or प्रहन्मः, परिहण्मः or परिहन्मः ।

This sûtra enjoins an option in certain cases, where it would have been obligatory by the last Ashṭâdhyâyi rule VIII. 4. 22.

In forming the perfect, the ह is changed to a guttural by VII. 3.54 S. 35.8.

PRESENT.

	Sing.	*Dual.*	*Plural.*
Third Person.	हन्ति ।	हतः ।	घ्नन्ति ।
Second Person.	हंसि ।	हथः ।	हथ ।
First Person.	हन्मि ।	हन्वः	हन्मः ।

Now we take up लिट् or the Perfect.

हन्+लिट् = हन् हन्+अ = ह + हान् + अ=अ + घान्+अ by VII. 3. 54. S. 358 = जघान । The dual is जघ्नतुः and the Plural जघ्नुः ॥

In forming the 2nd Pers. Singular, the following sûtra applies:—

२४३० । अभ्यासाच्च । ७ । ३ । ५५ ।

अभ्यासात्परस्य हन्तेर्हस्य कुत्वं स्यात् । जघनिथ-जघन्थ । हन्ता । 'ऋद्धनोः स्ये' (२३६६) इतीट् । हनिष्यति । हन्तु । हतात् । घ्नन्तु ।

2430. A Guttural is substituted for the ह in हन् after a reduplication also.

NOTE:—As जिघांसति, जङ्घन्यते, जघ्ने जघान ॥ The rule applies when such an affix follows which causes the reduplication of the stem (aṅga) हन्, therefore not in हन्नीयितुमिच्छति = जिहन्नीयिषति ॥

Thus we get जघनिथ or जघन्थ ।

NOTE:—Although this sûtra could apply to the third person singular as well, yet VII-3-54 alone has been mentioned simply because it is antaraṅga.

लिट् PERFECT

	sing.	*Dual.*	*Plural.*
Third Person.	जघान ।	जघ्नतुः ।	जघ्नुः ।
Second Person.	जघनिथ or जघन्थ ।	जघ्नथुः ।	जघ्न ।
First Person	जघान or जघन ।	जघ्निव ।	जघ्निम ।

लुट् I. FUTURE.

Third Person.	हन्ता ।	हन्तारौ ।	हन्तारः ।
Second Person.	हन्तासि ।	हन्तास्थः ।	हन्तास्थ ।
First Person.	हन्तास्मि ।	हन्तास्वः ।	हन्तास्मः ।

लृट् II. FUTURE (before स्य the augment इट् comes by VII-2-70 S. 2366.)

Third Per.	हनिष्यति ।	हनिष्यतः ।	हनिष्यन्ति ।
Second Per.	हनिष्यसि ।	हनिष्यथः ।	हनिष्यथ ।
विदाञ्चकार ।	विदाञ्चकृव ।	विदाञ्चकृम ।

When we form the Periphrastic Perfect with आम् by III. 1. 38. S. 2341, there is no guṇa of the इ of विद् because it is not penultimate, as the root given in S. 2341 is विद ending with अ and not विद् ending in a consonant.

The First Future is वेदिता । In the Imperative, we have the optional form, विदांकुर्वन्तु &c. also by the following:—

२४६५ । विदांकुर्वन्त्वित्यन्यतरस्याम् । ३ । १ । ४१ ।

वेत्तेर्लोट्याम् गुणाभावो लोटो लुक् लोडन्तकरोत्यनुप्रयोगश्च वा निपात्यते । पुरुषवचने न विवक्षिते इति भाष्यात् ।

2465. The form विदांकुर्वन्तु is optionally employed as an irregular form in the Imperative.

This irregular form is obtained by adding the affix आम् to the root विद् 'to know,' when followed by लोट् or the Imperative tense; the tense affixes of लोट् are then elided by *luk*; moreover there is no substitution of *guṇa* as required by VII. 3. 86; and when we have thus obtained the form विदाम्, we annex to it the

लोट् of the verb कृ; thus we have विदाङ्कुर्वन्तु or विदन्तु 'let them know.' The third person plural is not only intended to be spoken of by the employment of the form विदाङ्कुर्वन्तु in the aphorism; on the contrary, the word इति shows that all the numbers and persons of the Imperative may be so employed; as विदाङ्करोतु विदांकुरुताम् &c.

In other words the Periphrastic Imperative is formed by adding to विदां the Imperative of the root कृ । To form the Imperative of √kṛi, the following sûtras apply; it being remembered that the root √kṛi belongs to the Tanâdi class.

२४६६ । तनादिकृञ्भ्य उः । ३ । १ । ७९ ।

तनादेः कृञश्च 'उ'प्रत्ययः स्यात् । शपोऽपवादः । तनादित्वादेव सिद्धे कृञ्ग्रहणं 'गणकार्यमनित्यम्' इति ज्ञापनार्थम् । तेन 'न विश्वसेदविश्वस्तम्' इत्यादि सिद्धम् । विदां करोतु ।

2466. The affix उ comes after the roots of the Tanâdi class and after the verb कृ 'to make' when a sârvadhâtuka affix follows, signifying the agent.

This debars शप्. As तन्+उ+ति=तनोति 'he expands'; कृ+उ+ति=करोति 'he makes'. Though the root कृ is included in the list of the Tanâdi verbs, for which see Dhâtupâṭha, yet its separate enunciation in the present sûtra is for the sake of showing that the operations dependent upon a word being included in a gaṇa or class, are not of universal validity. Therefore forms like विश्वसेत् are valid, as in the sentence, न विश्वसेदविश्वस्तम् । Here there is not the elision of शप् in विश्वसेत् though the root श्वस् belongs to the adâdi class (No. 60). According to the Kâsikâ, the separate enunciation of कृ in this sûtra is for the sake of making a restrictive rule with regard to this verb; that is to say, the root कृ is a Tanâdi root only for the purposes of taking the affix उ; all the other operations of Tanâdi verbs are not to be performed upon it. Thus the rule II. 4. 79. does not apply to कृ. Thus अकृत and अकृथाः; the सिच् elision is compulsory and not optional.

Thus the 3rd Person Singular is विदांकरोतु । In forming the 3rd Per. Singular with तातङ् or of the Dual. &c. of the Imperative of कृ the following applies.

२४६७ । अत उत्सार्वधातुके । ६ । ४ । ११० ।

उप्रत्ययान्तस्य कृञोऽकारस्य उत्स्यात्सार्वधातुके क्ङिति । उविति तपरकरणसामर्थ्यान्न गुणः । विदां कुरुतात् विदां कुरुताम् । 'उतश्च-' (२३३४) इति हेर्लुक् । आभीयत्वेन लुकोऽसिद्धत्वादुत्वम् । विदां-कुरु । विदांकरवाणि । अवेत् । अविताम् । 'सिजभ्यस्त-' (२२२६) इति झेर्जुस् । अविदुः ।

2467. Before a Sârvadhâtuka affix* with an indicatory क् or ङ्, short उ is substituted for the अ of कृ (कर्+उ) when gunated.

Note:—Thus कृ + उ + तस् = कर् + उ + तस् (VII. 3. 84) = कुर् + उ + तस् = कुरुतः (VI. 4.110). The तस is कित् by I. 2.4. So also कुर्वन्ति, कुरु । Why do we say 'before a Sârvadhâtuka'? So that the rule may apply to what was once a Sârvadhâtuka, though no longer existent. Thus कुरु where the personal ending हि is elided, but it leaves its effect behind.

The त् in उत् shows that this उ is not to be gunated by VII. 3.86. When the affix is not कित् or ङित् we have करोति, करोषि and करोमि (1. 2. 4).

Thus we have विदांकुरुतात् । D. विदांकुरुताम् ।

In forming the 2nd Person Singular, the हि is elided by VI. 4. 106. S. 2334. This elision of हि is ordained by a sûtra which falls in the subdivision of asiddhas, under असिद्धवदत्राभात् (VI. 4. 22. S. 2183); and therefore, it is considered to have not taken place for the purposes of उ change required by VI. 4.110. S. 2467. Therefore we have the form कुरु though no sârvadhâtuka affix follows. Thus विदांकुरु । 1st Sing. विदांकरवाणि ।

The Imperfect 3rd S. is अवेत्; D. अवित्ताम् । The Plural is formed by झुस् under III. 4. 109. S. 2226. Thus अविदुः । In the 2nd Singular, there is रु substitution of द by the following:—

२४६८ । दश्च । ८ । २ । ७५ ।

धातोर्दस्य पदान्तस्य सिपि परे रुः स्याद्वा । अवेः-अवेत् । 'अस भुवि' । अस्ति ।

2468. द् or, रु may optionally be substituted for the final द् of a root, before the Personal-affix सि, when such द् stands at the end of a Pada.

Thus अवेः or अवेत्.

55 विद ज्ञाने (Parasmaipadi).

55 √ vida to know.

Pre. वेत्ति, वेद । विदतुः or वित्तः । विदन्ति or विदुः । वेत्सि or वेत्थ । वित्थः or विदथुः । वित्थ or विद । वेद्मि or वेद । विद्व or विद्वः । विद्म or विद्मः । Per. विवेद, विदांचकार । विविदतुः । विविदुः । विवेदिथ । विवेद । विविदिव । I Fut. वेदिता । II Fut. वेदिष्यति । Imperative वेत्तु or वित्तात् or विदांकरोतु । वित्तां । विदन्तु । विद्धि । वित्तं । वित्त । वेदानि । वेदाव । वेदाम । Imper. अवेत् । अवित्ताम् । अविदुः । अवेत् or अवेः । अवित्तम् । अवित्त । अवेदम् । अविद्व । अविद्म । Poten. विद्यात् । विद्याताम् । विद्युः । विद्याः । विद्याम् । Bene. विद्यात् । विद्यास्ताम् । Aorist अवेदीत् । अवेदिष्टाम् । अवेदिषुः । अवेदीः । अवेदिष्टम् । अवेदिष्ट । अवेदिषम् । अवेदिष्व । अवेदिष्म । Condi. अवेदिष्यत् । Pass. विद्यते । Caus. वेदयति । Aorist अवीविदत् । Deside. विविदिषति । Inten. वेविद्यते । yaṅ luk वेवेत्ति or वेविदीति । Nouns :— वेदः । वेद्यः । विदुरः । वित्तिः । वैदिकः । वेदना । विन्दुः । विद्या । चातुर्वैद्यः । Pre. Part. Parasmai. विदन् । विद्वान् Per. Part. Parasmai. विद्वान् । Past Part. Pass. विदितः । Act. विदितवान् Gerund विदित्वा (I. 2, 8. S. 2609)

55 √ vida. The root is Átmanepadi with the Preposition सम् (I. 3. 29. S. 2669).

Pre. संवित्ते । संविदाते । संविदते or संविद्रते । (VII. 1. 7. S. 2701). संवित्से । संविद्वे । Per. संविविदे । संविदांचक्रे । संविविदिषे । संविविदे । संविविदिवहे । I Fut. संवेदिता । संवेदितासे । II. Fut. संवेदिष्यते । Imperative संवित्तां । संविदातां । संविदतां or संविद्रतां । संवित्स्व । संवेदै । Imper. समवित्त । समविदातां । समविदत or समविद्रत । समवित्थाः । समविदि । Poten. संविदीत । संविदीयाताम् । Bene. संवेदिषीष्ट । संवेदिषीयास्ताम् । Aorist समवेदिष्ट । समवेदिषाताम् । Inten. । संवेवित्ते । D. संवेविदाते । संवेविदते ।

√अस ५६ भुवि । अस्ति ।

56 √asa, to be. The Present 3rd S. is अस्ति । In the dual अ is elided by the following :—

२४६९ । श्नसोरल्लोपः । ६ । ४ । १११ ।

श्नस्यास्तेश्चाकारस्य लोपः स्यात्सार्वधातुके क्ङिति । स्तः । सन्ति । 'तासस्त्योः-' (२१९१) इति सलोपः । असि । स्थः । स्थ । अस्मि । स्वः । स्मः । 'आर्धधातुके' (२४३२) इत्यधिकृत्य ।

2469. Before a Sârvadhâtuka कित् or ङित् affix, the अ of श्न and अस् is elided.

श्न is the characteristic of the roots of the Rudhâdi class, while अस् is the root itself. Thus रुन्धः ; रुन्धन्ति, भिन्तः, भिन्दन्ति ; So also of अस् :—स्तः, सन्ति । But भिनत्ति and अस्ति before non—कित् and non—ङित् affixes. श्न+अस् ought to be श्नास्, instead of that we have श्नसं in the sûtra. The पररूप single substitution is an irregularity.

	Sing.	*Dual.*	*Plural.*
	अस्ति ।	स्तः ।	सन्ति ।
(अस् + सि =)	असि । (The स is elided by VII. 4. 50. S. 2191).	स्थः ।	स्थ ।
	अस्मि ।	स्वः ।	स्मः ।

Before ârdhadhâtuka affixes, the root अस् is replaced by भू by the following sûtra which falls in the section governed by आर्धधातुके (II. 4. 35. S. 2432).

२४७० । अस्तेर्भूः । २ । ४ । ५२ ।

अभूत । भविता । अस्तु । स्तात् । स्ताम् । सन्तु ।

2470. भू is the substitute of the verb अस् 'to be,' when an ârdhadhâtuka affix is to be applied.

Thus अभूत । Fut. भविता 'he will be,' भवितुम् 'in order to be,' भवितव्यम् 'must be.' *Note* :—Now the Perfect tense affixes are also ârdhadhâtuka affixes (III. 4. 115). The Perfect of अस् is therefore the same as that of भू, namely, बभूव &c. There is, however, an important exception to this rule, namely, when अस् is employed as an auxiliary verb in forming Periphrastic Perfect of other verbs. In that case अस् forms its Perfect tense regularly, आस, आसतुः, आसुः &c. This apparent breach of the present sûtra is explained by taking the term अस् in III.

1. 40. as a Pratyâhâra including स, धु, and अस्, and if अस् could not form its Perfect in the regular way, its inclusion in this Pratyâhâra would be useless; hence we conclude, that as an auxiliary verb, अस् forms its Perfect regularly.

The Imperative is अस्तु or स्तात् । 3rd स्ताम् । Pl. सन्तु । In the Second Person Singular अस् + हि the following applies :—

२४७१ । घ्वसोरेद्धावभ्यासलोपश्च । ६ । ४ । ११९ ।

घोरस्तेश्चैत्वं स्याद्धौ परेऽभ्यासलोपश्च । आभीयत्वेनैत्वस्यासिद्धत्वाद्धेर्धिः । 'श्नसोः-' (२४६९) इत्यल्लोपः । एधि । तातङ्पक्षे एत्वं न । परेण तातङा बाधात् । '× सकृद्गतौ-×' इति न्यायात् । स्तात् । स्तम् । स्त । असानि । असाव । असाम । 'अस्तिसिचः-' (२२२५) इतीट् । आसीत् । 'श्नसोः-' (२४६९) इत्यल्लोपस्याभीयत्वेनासिद्धत्वादाट् । आस्ताम् । आसन् । स्यात् । भूयात् । अभूत् । सिचोऽस्तित्व विद्यमानत्वेन विशेषणादीत्वम् ।

2471. For the final vowel of the roots दा and धा (घु), and for the स् of अस्, is substituted ए before the Imperative ending हि ; and thereby the reduplicated syllable of दा and धा is elided.

Thus (देहि, and धेहि, of घु, and) एधि of अस, the स is elided by this sûtra, and अ is elided by VI. 4. 111. S. 2469. This लोप of the present sûtra should be considered as having an indicatory श् so that the *whole* of the reduplicate and not only the final letter of the abhyâsa (I. 1. 55) is elided.

Sing.	*Dual.*	*Plural.*
अस्तु	स्ताम्	सन्तु
एधि	स्तम्	स्त
असानि	असाव	असाम
	आट्	
आसीत्	आस्ताम्	आसन्
आसीः	आस्तं	आस्त
आसम्	आस्व	आस्म

This ए ordained by the present sûtra is considered asiddha, as it falls in the âbhîya section (VI. 4. 22. S. 2183) and therefore हि is changed to धि by VI. 4. 101. S. 2425, for it is considered to have come after a झल् letter स्, though this स् no longer exists. But when तातङ् is added in the Imperative Second Singular, there is no ए change of the स of अस् । Because the तातङ् is ordained by a subsequent sûtra, and debars it. Even after the adding of तातङ्, there is no ए change by considering it as sthânivat to its principal हि, on the maxim that a rule once set aside, is set aside for good.

Thus we have स्तात् । स्तम् । स्त । असानि । असाव । असाम । In the Imperfect we have ईट् by VII. 3. 96. S. 2225. as आसीत् । In the dual, there is आट् augment before स्ताम् (VI. 4. 72. S. 2254), because the elision of अ by S. 2469 is asiddha, it being an âbhîya rule, and hence स्ताम् is considered as beginning with vowel. Thus we have आस्ताम् । Pl. आसन् । Pot. स्यात् । Ben. भूयात् । Aor. अभूत् । This is thus derived. अभू + सिच् + त् = अभू + ० + त् (the सिच् is elided by II.

4. 77. S. 2223). Now the aprikta स् required ईट् by VII. 3. 96. S. 2225. But it is not added, as we have already explained under that sûtra, that ईट् comes only then when सिच् and अस् exist as सिच् and अस् । See page 31. of this volume. Therefore we have अभूत् ।

The स of अस् is changed to ष् when preceded by an alterant preposition, by the following :—

२४७२ । उपसर्गप्रादुर्भ्यामस्तिर्यच्परः । ८ । ३ । ८७ ।

उपसर्गेभ्यः प्रादुसश्च परस्यास्तेः सस्य षः स्याद्यकारेऽचि च परे । निष्यात् । प्रादुःष्यात् । निषन्ति । प्रादुःषन्ति । 'यच्परः' किम् । अभिस्तः । 'मृजू ५७ शुद्धौ' ।

2472. The स् of the verb अस् is changed to ष्, when it is followed by a vowel or य् and is preceded by प्रादुः, or an upasarga having इ or उ in it.

The word यच् परः means 'followed by य् or अच्' ॥ The word प्रादुः is an Indeclinable, meaning 'evidently.'

Thus अभिषन्ति, निषन्ति विषन्ति, प्रादुःषन्ति; अभिष्यात्, निष्यात्, विष्यात्, प्रादुःष्यात् ॥

Why do we say "when it is followed by a vowel or य्" ? Observe निस्तः, विस्तः, प्रादुस्तः ॥

५६ अस भुवि ।

56 √asa, to be.

Pre. अस्ति । स्तः । सन्ति । असि । स्थः । स्थ । अस्मि । स्वः । स्मः । Per. बभूव or आस । आसतुः । आसुः । आसिथ । आसथुः । आस । आस । आसिव । आसिम । I Fut. भविता । II Fut. भविष्यति । Imp. अस्तु or स्तात् । स्ताम् । सन्तु । एधि or स्तात् । स्तं । स्त । असानि । असाव । Imper. आसीत् । आस्ताम् । आसन् । आसीः । आसम् । आस्व । Pot. स्यात् । स्यातां । स्युः । स्याः । स्याम् । स्याव । Bene. भूयात् । Aor. अभूत् । अभूवन् । अभूः । Cond. अभविष्यत् । Pass. भूयते । Cau. अस्तेःस्थाने भूरादेशात् अन्यानि रूपाणि भूधातोर्ज्ञेयानि । Nouns :—आस्तिकः नास्तिबाधकः आस्तिनास्ती ।

56 √asa. This root is Atmanepadi, also, when preceded by व्यति ।

Pre. व्यतिस्ते । व्यतिषाते । व्यतिषते । व्यतिसे । व्यतिषाथे । व्यतिध्वे । व्यतिहे । व्यतिस्वहे । Imper. व्यत्यसै ।

57 √mṛijû to wipe, wash off, cleanse. The ऋ gets vṛiddhi by the following sûtra :—

२४७३ । मृजेर्वृद्धिः । ७ । २ । ११४ ।

मृजेरिको वृद्धिः स्याद्धातुप्रत्यये परे । 'क्ङित्यजादौ वेष्यते' । 'व्रश्च-' (२९४) इति षः । मार्ष्टि । मृष्टः । मृजन्ति-मार्जन्ति । ममार्ज । ममार्जतुः-ममृजतुः । ममार्जिथ-ममार्ष्ठ । मार्जिता-मार्ष्टा । मृड्ढि । अमार्ट् । अमार्जम् । अमार्जीत्-अमार्क्षीत् । 'वचिर् ५८ परिभाषणे' ।

2473. The Vṛiddhi (आर्) is substituted for the root vowel (ऋ) of the stem मृज् before any affix that is ordained after a root, provided it is not कित् or ङित् ।

As मार्ष्टा, मार्ष्टुम्, मार्ष्टव्यम् । The मृज् here is a root, and the affixes before which this Vṛiddhi takes place are those which come after *roots*, and not which come after Prâtipadikas. Therefore, not before the affixes भ्यां &c. as कंसपरिमृड्भ्याम्, मृड्भिः । The anuvṛitti of the word vibhakti has ceased. This sûtra debars guṇá of VII. 3. 84.

Ishṭi:—The vṛiddhi is optional before a कित् or ङित् affix whose first letter is a vowel.

The ज is changed to ष् by VIII. 2. 36. S. 294. Thus मृज् + ति = मार्ज् + ति = = मार्ष् + ति = मार्ष्टि ।

मृजू ५७ शुद्धौ ।

57 √ mṛijû, to wipe or wash off, cleanse.

Pre. मार्ष्टि । मृष्टः । मृजन्ति or मार्जन्ति । मार्क्षि । मृष्ठः । मृष्ठ । मार्ज्मि । मृज्वः । मृज्मः । Per. ममार्ज । ममार्जतुः or ममृजतुः । ममृजुः or ममार्जुः । ममार्जिथ or ममार्ष्ठ । ममार्जिव, ममृजिव or ममृज्व । I Fut. मार्जिता, मार्ष्टा । II Fut. मार्जिष्यति, मार्क्ष्यति । Imp. मार्ष्टु or मृष्टात् । मृष्टां । मृजन्तु or मार्जन्तु । मृड्ढि । मार्जानि । मार्जाव । मार्जाम । Imper. अमार्ट् । अमृष्टाम् । अमृजन् or अमार्जन् । अमार्ट् । अमार्जम् । अमृज्व । Pot. मृज्यात् । मृज्याताम् । मृज्युः । मृज्यां । Bene. मृज्यात् । मृज्यास्ताम् । Aor. अमार्जीत् or अमार्क्षीत् । अमार्जिष्टाम् or अमार्ष्टाम् । अमार्जिषुः or अमार्क्षुः । अमार्जीः or अमार्क्षीः । अमार्जिषम् or अमार्क्षम् । Con. अमार्जिष्यत्, अमार्क्ष्यत् । Pass. मृज्यते । Cau. मार्जयति । Aorist. अमीमृजत् or अममार्जत् । Des. मिमृक्षति, मिमार्जिषति । Int. मरीमृज्यते । yañluk मरीमार्ष्टि or मरिमार्ष्टि or मरीमर्जीति । Nouns :—अपामार्गः । मार्जारः । मार्जारीयः । मज्जा । Pre. Part. Par. मार्जन्, मृजन् । Past. Par. Pass. मृष्टः । Act. मृष्टवान् । Ger. मार्जित्वा, मृष्ट्वा ।

58 √ rud ir, to weep, to shed tears.

This रुद् + ति । Now applies the following sûtra by which इट् is added even in Sârvadhâtuka affixes :—

२४७४ । रुदादिभ्यः सार्वधातुके । ७ । २ । ७६ ।

'रुद्' 'स्वप्' 'श्वस्' 'अन्' 'जक्ष्' एभ्यो वलादेः सार्वधातुकस्येट् स्यात् । रोदिति । रुदितः । ङ्गे परत्वादिटि ङित्वं न । रुदिहि ।

2474. A sârvadhâtuka affix beginning with a consonant other than a य, gets the augment इट् after the root रुद्, and the four that follow it namely स्वप्, श्वस्, अन् and जक्ष् ।

Thus रोदिति, स्वपिति, श्वसिति, अनिति, जक्षिति । But जाग्रति which is beyond the five, and स्वप्ता before ârdhadhâtuka affixes, and रुदन्ति before a vowel beginning affix.

The dual is रुदितः । The हि is not changed to धि by VI. 4. 101. S. 2425 by the असिद्धवत् paribhâsha, as the इट् augment is subsequently taught. Or in the sûtra VI. 4 101. S. 2425 we may read the anuvṛitti of झल्, and it is only when हि begins with a झल्, that the rule will apply. Here by the addition of इट् the affix हि becomes ajâdi; and so that rule has no scope. Thus रुदिहि ।

In the Imperfect there are ईट् and अट् augments by the following two sûtras.

२४७५ । रुदश्च पञ्चभ्यः । ७ । ३ । ९८ ।

रुदादेः पञ्चकात् सार्वधातुकस्यापृक्तस्य ईट् स्यात् ।

2475. After रुद् and the four roots that follow it, comes the augment ईट् to a sârvadhâtuka affix consisting of a single consonant.

२४७६ । अड् गार्ग्यगालवयोः । ७ । ३ । ९९ ।

अरोदीत्-अरोदत् । अरुदिताम् । अरुदन् । अरोदीः-अरोदः । प्रकृतिप्रत्ययविशेषापेक्षाभ्यामीडड्भ्यामन्तरङ्गत्वाद्यासुट् । रुद्यात् । अरुदत्-अरोदीत् ।

'ञिष्वप् ५९ शये' । स्वपिति । स्वपितः । सुष्वाप । सुषुपतुः । सुषुपुः । सुष्वपिथ-सुष्वप्थ ।

2476. According to the opinion of Gârgya, and Gâlava, the augment अट् comes before a Sârvadhâtuka affix consisting of a single consonant, after the above five roots रुद &c. .

Thus we have अरोदीत् with ईट्, or अरोदत् with अट् added to त् । Similarly अरोदीः or अरोदः ।

Note :—As अरोदीत्, अरोदीः, अस्वपीत् and अस्वपीः, अश्वसीत्, अश्वसीः, प्राणीत्, प्राणीः, अजक्षीत्, अजक्षीः ॥ Why of these five only ? Observe अजागर् भवान् ॥ Why an aprikta affix ? Observe रोदिति ॥ The word रुदः in the preceding sûtra is singular, though it ought to have been plural.

Note :—As अरोदत् अरोदः, अस्वपत् अस्वपः, अश्वसत् अश्वसः, प्राणत् प्राणः, अजक्षत् अजक्षः ॥ The names of Gârgya aud Gâlava are mentioned for honoris causa.

Note :—The mention of these names is not for the sake of "option" (विकल्पार्थम्). Because the very injunction about अट्, would make the ईट् of the preceding sûtra optional. The meution of more than one Achârya in the sûtra is also for this very reason.

In the Potential, the यासुट् augment is added first to the affix, because it is antaranga, as it depends merely on the Mood लिङ्, while with regard to it, the ईट् and अट् augments are Bahiranga, because they depend on a particular base (prakṛiti such as √*rud &c.*) and a particular affix (pratyaya, namely only those which are apṛikta). Therefore ईट् and अट् augments, though taught subsequent to यासुट् augment, do not debar it, because they are of weaker force compared with it. Therefore यासुट् is added first, and the 3rd Per. S. affix becomes यात्, which being no longer apṛikta, there is no occasion for adding to it the augments ईट् or अट् of these two sûtras. Thus we have रुद्यात् ।

The aorist is अरुदत् or अरोदीत्.

रुदिर् ५८ अश्रुविमोचने ।

58√ rudir to weep, to cry.

Pre. रोदिति । रुदितः । रुदन्ति । रोदिषि । रुदिथः । रुदिथ । रोदिमि । रुदिवः । रुदिमः । Per. रुरोद । रुरुदतुः । रुरुदुः । रुरोदिथ । रुरुदथुः । रुरुद । रुरोद । रुरुदिव । रुरुदिम । I Fut. रोदिता । II Fut. रोदिष्यति । Imp. रोदितु or रुदितात् । रुदिताम् । रुदन्तु । रुदिहि । रुदितम् । रुदित । रोदानि । रोदाव । रोदाम । Imp. अरोदीत् or अरोदत् । अरुदिताम् । अरुदन् । अरोदीः or अरोदः । अरुदितं । अरुदित । अरोदम् । अरुदिव । अरुदिम । Pot. रुद्यात् । रुद्यातां । रुद्युः । रुद्याः । रुद्यातम् । रुद्यात । रुद्याम् । Ben. रुद्यात् । रुद्यास्ताम् । Aor. अरुदत् or अरोदीत् । अरुदताम् or अरोदिष्टाम् । अरुदन् । अरुदः अरुदम् । अरुदाव । Con. अरोदिष्यत् । Pass. रुद्यते । Cau. रोदयति । Aorist. अरूरुदत् । Des. रुरुदिषति । In. रोरुद्यते । Yaṅ luk रोरुदीति or रोरोत्ति । Du. रोरुत्तः । Imper. अरोरोत् । Nouns :—रोदसी । रुद्राणी । रुद्रः । शतरुद्रीयम् ।

59√ ñi ṣhvap to sleep.

The Present is स्वपिति । स्वपितः &c. The Perfect is सुष्वाप । सुषुपतुः । सुषुपुः &c. When the root takes the upasargas सु or वि or निर् or दुर् then the स of the vocalised सु in the Perfect is changed to ष by the following :—

२४७७ । सुविनिर्दुर्भ्यः सुपिसूतिसमाः । ८ । ३ । ८८ ।

एभ्यः सुप्यादेः सस्य षः स्यात् । 'पूर्वं धातुरुपसर्गेण युज्यते' । किति लिटि परत्वात्संप्रसारणे कृते द्वित्वम् । × पूर्वत्रासिद्धीयमद्विर्वचने × । सुषुषुपतुः । सुषुषुपुः । अकिति तु द्वित्वेऽभ्यासस्य संप्रसारणम् । षत्वस्यासिद्धत्वात्ततः पूर्वं 'हलादिः शेषः' (२१७९) । नित्यत्वाच्च । ततः सुपि रूपाभावान्न षः । सुषुष्वाप । सुस्वप्ता । अस्वपीत्–अस्वपत् । स्वप्यात् । सुप्यात् । सुषुप्यात् । अस्वाप्सीत् । 'श्वस ६० प्राणने' । श्वसिति । श्वसिता । अश्वसीत्–अश्वसत् । श्वस्यातम् । श्वस्यास्ताम् । 'ह्म्यन्तक्षण–' (२२९९) इति न वृद्धिः । अश्वसीत् । 'अन ६१ च' । अनिति । आन । अनिता । आनीत्–आनत् ।

2477. The स् of स्वप् when it assumes the form सुप्, and of सूति, and सम is changed to ष् after सु, वि, निर् and दुर् ॥

The maxim is that the root is first joined with the upasarga, and then grammatical rules applied. Thus the compound verbs are सुस्वप्, विस्वप् &c. To this when the affixes of the Perfect which are कित् are added, then first there is vocalisation of व into उ, and स changed to ष, and then reduplication. That is the steps are (1) सुसुप (2) सुषुप, (3) सुषुप षुप । For the purposes of reduplication the स changed to ष by the rule of Tripâdi ought to have been considered asiddha by VIII. 2. 1. This is prevented by the maxim already given under S. VI. 1. 3, *i. e.*, for the purposes of reduplication, the Tripâdi rules are not asiddha. Therefore ष is reduplicated. Thus we have the following equation: सु + स्वप् + अतुस् = सु-सुप + अतुस् (VI. 1. 15. S. 2409) = सु + षुप + अतुस् (VIII. 3. 88. 2477) = सुषुपषुप + अतुस् (पूर्वत्रासिद्धीयमद्विर्वचने) = सुषुषुपतुः । So also सुषुषुपुः ।

Before those affixes of लिट् which are not कित्, there is reduplication first, and then vocalisation of the abhyâsa. The ष change ordained by the present Tripâdi sûtra being considered asiddha (VIII. 2. 1.); the हलादिः शेषः (S. 2179) rule

applies prior to it. And because it is a *nitya* rule also, therefore it applies first. When हलादिशेषः has applied, there remains no *form* सुप् but only सु, and therefore the present rule does not apply, and there is no ष change. Thus सुस्वप् + णल् = सुस्वप्स्वप् + णल् = सुसुप्स्वप् + णल् = सुसुस्वप् + णल् (S. 2179). Now the second सु cannot be changed to षु by the present sûtra because the condition for the application of this rule, namely the existence of the form सुप् is absent. Thus we get सुसुष्वाप and सुष्वप्त ।

Note :—The word सुपि is exhibited in the sûtra as the form of स्वप् with vocalisation. Thus सुषुप्तः, विः सुप्तः, दुः सुप्तः ॥ The word सूति is the क्तिन् ending form of सू; the rule applies to this form only, as सुषूतिः, विषूतिः, निषूतिः and दुःषूतिः ॥ The word सम also means the *noun* सम and not the verb षम ष्टम वैक्लव्ये ॥ Thus सुषमम्, विषमम्, निःषमम्, दुःषमम् ॥

Note :—The following kârikâ sums up the above discussion.

Kârikâ:—सुपेः षत्वं स्वपेर्मा भूद्विसुष्वापेति केन न ।
हलादिशेषान्न सुपिरिष्टं पूर्वं प्रसारणम् ॥
स्थादीनां नियमो नात्र प्राक्सितादुत्तरः सुपिः ।
अनर्थके विषुषुपः सुपिभूतो द्विरुच्यते ॥

Kârikâ—Why is षत्व taught with regard to the सुप् form of स्वप् ? *Ans.* सुपेः षत्वं स्वपेर्मा भूत्, so that the षत्व change should not take place in स्वप् form, as विस्वप्नः and विस्वप्नक् (III. 2. 172). *Q.* विसुष्वापेति केन न ? For what reason the षत्व change has not taken place in the reduplicate विसुष्वाप, for here also in the reduplicate, is the form सुप्, as विसुप्स्वप्, and then by applying हलादिशेष rule, the प् is elided, and एकदेशविकृतस्यानन्यत्वात् applies ? *Ans.* हलादि शेषान् न सुपिः, we reduplicate the form स्वप्, as विस्वप्स्वप् and then elide प् as विस्वस्वप्, and then vocalise, as विसुस्वप्, so that there being no form सुप्, there is no षत्व ॥ इष्टं पूर्वं प्रसारणं, in fact, the vocalisation takes place first, and then elision according to an ishṭi. See VI. 1. 17. Otherwise, in स्वप् स्वप्, as प् is elided, व् would also have been elided. Why is the स of विसुष्वाप not changed to ष by VIII. 3. 64 ? स्थादीनां नियमो नात्र प्राक् सितादुत्तरः सुपि, the rule VIII. 3 64 does not apply, because that rule is confined only to verbs up to सित in VIII. 3. 70, while सुप् is *after* that verb. Moreover the प् of सुप् being elided, the mere सु is अनर्थक, and the maxim is अर्थवद् ग्रहणे नानर्थकस्य ॥ *Q.* If this maxim is applied, how do you form विषुषुपः ? *Ans.* अनर्थके विषुषुपः सुपिभूतो द्विरुच्यते, here the form सुप् is doubled, and not सु ॥ The root is first joined with the affix वि + स्वप्, then there is vocalisation विसुप्; then there is ष change, as विषुप्, then reduplication, as विषुषुप् ॥ Now षत्व being considered asiddha, the doubling should take place first ? No, for we have already shown that for the purposes of doubling, the षत्व change is not asiddha (VIII. 2. 3 Vârt.)

√ञिष्वप ५९ शये ।

59 √ñishvap to lie down, to sleep.

Pre. स्वपिति । स्वपितः । स्वपन्ति । स्वपिषि । स्वपिथः । स्वपिथ । स्वपिमि । स्वपिवः । स्वपिमः । Per. सुष्वाप । सुषुपतुः । सुषुपुः । सुष्वप्थ or सुष्वपिथ । सुषुपथुः । सुषुप । सुष्वाप । सुषुपिव । सुषुपिम । I Fut. स्वप्ता । II Fut. स्वप्स्यति । Imp. स्वपितु । स्वपिताम् । स्वपन्तु । स्वपिहि । स्वपितम् । स्वपित । स्वपानि । स्वपाव । स्वपाम । Imperfect अस्वपत् or अस्वपीत् । अस्वपिताम् । अस्वपन् । अस्वपः or अस्वपीः । अस्वपितम् । अस्वपित । अस्वपम् । अस्वपिव । अस्वपिम । Pot. स्वप्यात् । स्वप्याताम् । Bene. सुप्यात् । सुप्यास्ताम् । Aorist अस्वाप्सीत् । अस्वाप्ताम् । अस्वाप्सुः । अस्वाप्सीः । अस्वाप्सम् । Con. अस्वप्स्यत् । Pass. सुप्यते । With the Preposition सु, we have सुषुप्यते । Cau. स्वापयति । Aorist असूषुपत् । Des. सुषुप्सति । With वि, we have विषुषुप्सति । Inten. सोषुप्यते । (VI. 1. 19. S. 2645.) विषोषुप्यते । Yañ luk. सास्वपीति । Nouns :—स्वप्नः ।

√श्वस ६० प्राणने ।

60 √śvas to breathe. In the Potential, the root is conjugated like the Bhuadi, the vikaraṇa शप् is not elided. This is the view of the Mâdhaviya. Bhattoji would elide शप् here also. The Potentials would according to him be श्वस्यात्, D. श्वस्याताम् &c.

Pre. श्वसिति । श्वसितः । श्वसन्ति । श्वसिषि । श्वसिमि । Per. शश्वास । शश्वसतुः । शश्वसिथ । शश्वस । शश्वास । शश्वसिव । I Fut. श्वसिता । II Fut. श्वसिष्यति । Imperative श्वसितु । श्वसिहि । श्वसानि । Imper. अश्वसत् or अश्वसीत् । अश्वसिताम् । अश्वसीः । अश्वसः । अश्वसम् । अश्वसिव । Poten. श्वसेत् । श्वसेतां । श्वसेयुः । श्वसेः । श्वसेयम् । Bene. श्वस्यात् । श्वस्यास्ताम् । Aorist अश्वसत् । or अश्वसीत् । (There is no vṛiddhi because of S. 2299). अश्वसिष्टाम् । अश्वसिषुः । अश्वसिषम् । Condi. अश्वसिष्यत् । Pass. श्वस्यते । Caus. श्वासयति । Aorist अशिश्वसत् । Deside. शिश्वसिषति । Inten. शाश्वस्यते । yañ luk शाश्वसीति । Nouns:—श्वसनः । आश्वस्तः । श्वासः ।

61 √ana to breathe.

The Pre. is अनिति, Perf. आन, I Fut. अनिता, Imper. आनीत् or आनत् ।

The न of this root is changed to ण after an alterant preposition by the following sûtra.

२४७८ । अनितेः । ८ । ४ । १९ ।

उपसर्गस्थान्निमित्तात्परस्यानितेर्नस्य णः स्यात् । प्राणिति ।

'अन अव अभिषवनयोः' । अनिति । अनितः ।

2478. The न of the verb अन् 'to breathe', is changed into ण, when preceded by an upasarga competent to produce the change.

Thus प्र+अनिति=प्राणिति 'he breathes.' पराणिति । For इट् augment, see VII. 2 76.

√अन ६१ च (प्राणने)।

61 √ana to breathe.

Pre. अनिति । अनितः । अनन्ति । अनिषि । अनिमि । Per. आन (प्र+आन=प्राण) प्राणतुः । प्राणुः । प्राणिथ । प्राणिव । I Fut. अनिता । II Fut. अनिष्यति । Imperative प्र+अनितु or प्राणितात् । Imper. आनीत्, आनत् । Poten. अन्यात् । प्राण्यात् । Bene. अन्यात् । प्राण्यात् । प्राण्यास्ताम् । Aorist आनीत् । प्राणीत् । प्राणिष्टाम् । प्राणीः । Condi. आनिष्यत् Pass. अन्यते । Caus. आनयति । प्राणयति । Aorist प्राणिणत् । Deside. अनिनिषति । प्राणिनिषति । Nouns—प्राणः ।

62. √jakṣha 'to eat,' when it is the reduplicated form of घस्; and 'to laugh,' when it is the reduplicated form of हस् ।

The Pre. Sing. is जक्षिति, Dual. जक्षितः । In the plural the अन्त् is replaced by अत् by the following.

२४७९ । अदभ्यस्तात् । ७ । १ । ४ ।

झस्य अत्स्यात् । अन्तापवादः । जक्षति । 'सिजभ्यस्त–' (२२२६) इति जुस् । अजक्षुः । अयमन्तःस्थादिरित्युज्ज्वलदत्तो भ्रान्तः । रुदादयः पञ्च गताः ।

2479. अत् is substitute for झ after a reduplicated verbal stem.

This debars the अन्त substitution required by VII. 1. 3. S. 2169. Thus जक्ष्+झि=जक्षति । In the Imperfect Plural however जुस् replaces झि by III. 4. 109. S. 2226. As अजक्षुः ।

Ujjvaladatta gives this root as यक्ष, and not जक्ष which is a mistake.

जक्ष ६२ भक्षहसनयोः ।

62 √jaksha 1. to eat 2. to laugh.

Pre. जक्षिति । जक्षितः । जक्षति । जक्षिषि । जक्षिमि । Per. जजक्ष । जजक्षिथ । जजक्षिव । I Fut. जक्षिता । II Fut. जक्षिष्यति । Imperative जक्षितु । जक्षितां । जक्षतु । जक्षिहि । जक्षाणि । Imper. अजक्षीत्, अजक्षत् । अजक्षिताम् । अजक्षुः । Poten. जक्ष्यात् । जक्षेत् according to Chandra. जक्ष्याताम् । Bene. जक्ष्यात् । जक्ष्यास्ताम् । Aorist अजक्षीत् । अजक्षिष्टाम् । अजक्षीः । अजक्षिषं । Condi. अजक्षिष्यत् । Pass. जक्ष्यते । Caus. जक्षयति । Aorist अजजक्षत् । Deside. जिजक्षिषति । Inten. जाजक्ष्यते । yaṅ luk जाजक्षीति or जाजक्ष्टि । Noun:—जक्षत् ।

Here end the five roots beginning with √rud.

'जागृ ६३ निद्राक्षये' । जागर्ति । जागृतः । जाग्रति । 'उषविद–' (२३४१) इत्याम्वा । जागरांचकार–जजागार ।

63 √jâgṛi to awake.

The Pre. is जागर्ति, Dual. जागृतः, Pl. जाग्रति । In the Perfect there is optionally Periphrastic आम् by III. 1. 38. S. 2341.* As जागरां चकार or जजागार । In the dual, we have guṇa by the following:

२४८० । जाग्रोऽविचिण्णल्ङित्सु । ७ । ३ । ८५ ।

जागर्तेर्गुणः स्याद्विचिण्णल्ङिद्भ्योऽन्यस्मिन्वृद्धिविषये प्रतिषेधविषये च । अजागरुः । अजागः । अजागृताम् । अभ्यस्तत्वाज्जुस् ।

2480. The Guṇa (instead of Vṛiddhi or its prohibition) is substituted for the ऋ of the stem जागृ, except before the affix वि, before the Aorist character चिण्, before the Personal ending णल् of the Perfect, and before an affix with an indicatory ङ् ॥

Thus अजागरुः । The Imperfect is अजागः । D. अजागृताम् । In the plural, the root being a reduplicated one we have जुस् by VII. 1. 4. S. 2479. Before this जुस्, the ऋ of jâgṛi takes guṇa by the following:

२४८१ । जुसि च । ७ । ३ । ८३ ।

अजादौ जुसीगन्ताङ्गस्य गुणः स्यात् । अजागरुः । 'अजादौ' किम् । जागृयुः । आशिषि तु जागर्यात् । जागर्यास्ताम् । जागर्यासुः । लुङि अजागरीत् । 'जागृ स ईत्' इत्यत्र सत्पाप्तुः, तं सार्वधातुकगुणो बाधते, तं सिचि वृद्धिः, तां जागर्तिगुणः, तत्र कृते हलन्तलक्षणा प्राप्ता, 'नेटि' (२२६८) इति निषिद्धा, ततः 'अतो हलादेः-' (२२८४) इति आधित्वा 'अतो ल्रान्तस्य' (२२३०) इति प्राप्ता, 'ह्म्यन्त-' (२२९९) इति निषिध्यते । तदाहुः—

'गुणो वृद्धिर्गुणो वृद्धिः प्रतिषेधो विकल्पनम् ।

पुनर्वृद्धिर्निषेधोऽतो यण्पूर्वाः प्राप्तयो नव ॥'

इति । 'दरिद्रा ४४ दुर्गतौ' । दरिद्राति ।

2481. Before the personal-ending जुस् (उस्) of the Imperfect when it begins with a vowel, guṇa is substituted for the final इ, ई, उ, ऊ, ऋ, ॠ, and ऌ of the stem.

Note:—As अजुहवुः, अबिभयुः, अबिभरुः, अजागरुः ॥ This Personal ending is ङित् according to I. 2. 4, and would not have caused guṇa (I. 1. 5), but for this sûtra. The ending जुस् (III. 4. 108) comes in the लिङ् also. There, however, it does not cause guṇa. As बिभृयुः, जुहुयुः ॥ Here there are two ङित् affixes, the augment यासुट्, and the sârvadhâtuka जुस्; and the यासुट् prevents guṇa. The इक् is read into the sûtra from I. 1. 3.

As अजागरुः । Why do we say that the affix जुस् must be ajâdi or vowel-beginning? When this affix takes the augment यासुट् of the Potential, it assumes the form युस्, and is no longer vowel-beginning. Before it, there will be no guṇa. As जागृयुः । The Ben. forms are जागर्यात्, D. जागर्यास्ताम्, Pl. जागर्यासुः । The Aorist is अजागरीत् । It is thus evolved:

जागृ+स+ई+ईत्. The ऋ followed by स required to be changed to र् by VI. 1. 77. This is prevented by the Guṇa rule VII. 3. 84. S. 2168. The ऋ ought to become अर् । This guṇa however is set aside by the Vṛiddhi rule VII. 2. 1. S. 2297.

This vṛiddhi, however, is set aside by peculiar guṇa of jâgṛi under VII. 3. 85. S. 2480. Thus we get जागर् +इ+स्+ईत्

Now the root being जागृ ending in a consonant, sûtra VII. 2. 3. S. 2267 requires the vṛiddhi of ऋ; but this vṛiddhi, in its turn is set aside by VII. 2. 4. S. 2268. But now VII. 2. 7. S. 2284 requires *optional* vṛiddhi; but it is restricted by VII. 2. 2. S. 2330, and the vṛiddhi becomes compulsory. But VII. 2. 5. S. 2299 sets aside this vṛiddhi also. Thus.

जागृ+इस्=जागृ+इस्(VI.1. 77. S 47)=जागर्+इस् (VII. 3. 84. S. 2168)=जागार्+इस् (VII. 2. 1. S. 2297)=जागर्+इस् (VII. 3.85. S. 2480)=जागार्+इस् (VII. 2.3. S. 2267) =जागर्+ इस् (VII. 2. 4. S. 2268)= जागार or जागर्+इस् (VII. 2. 7. S. 2284) =जागार्+इस् (VII. 2. 2. S. 2330)=जागर्+इस् (VII. 2. 5. S. 2299).

The following verse sums up these.

"Guṇa Vṛiddhi, Guṇa, Vṛiddhi, prohibition, option, again Vṛiddhi and then exception, these, with the change of ṛi into a semi vowel in the first instance, are the nine results."

√ जागृ ६३ निद्राक्षये ।

63. √ jâgṛi to wake.

Pre. जागर्ति । जागृतः । जाग्रति । जागर्षि । जागर्मि । जागृवः । Per. जागराञ्चकार, जजागार । जजागरतुः । जजागरुः । जजागरिथ । जजागरथुः । जजागर । जजागार । जजागरिव । I Fut. जागरिता । II Fut. जागरिष्यति । Imperative जागर्तु or जागृतात् । जागृतां । जाग्रतु । जागृहि । जागराणि । Imper. अजागः । अजागृताम् । अजागरुः । अजागः । अजागरम् । अजागृव । Poten. जागृयात् । जागृयाताम् । जागृयुः । जागृयाः । जागृयां । जागृयाव । Bene. जागर्यात् । जागर्यास्ताम् । Aorist अजागरीत् । अजागरिष्टाम् । अजागरिषुः । अजागरीः । अजागरिषं । Condi. अजागरिष्यत् । Pass. जागर्यते । Caus. जागरयति । Aorist अजजागरत् । Deside. जिजागरिषति । Inten. जाजागर्यते । Nouns :—जागरूकः । जागरा । जागर्या । जागृविः । जजागृवान् । Past. Part. Pass. जागरितः । Act. जागरितवान् । Fut. Part. जागरिष्यन् । Gerund जागरित्वा । Infini. जागरितुं । Adj. जागरितव्यं । जागरणीयं । जागर्यम् ।

64. √ daridrâ to be poor. The Present 3rd Singular is दरिद्राति । In forming the Dual, the आ is replaced by इ, by the following :

२४८२ । इद्दरिद्रस्य । ६ । ४ । ११४ ।

दरिद्रातेरिकारः स्याद्धलादौ क्ङिति सार्वधातुके । दरिद्रितः ।

2482. इ is substituted for the आ of दरिद्रा before a Sârvadhâtuka कित् or ङित् affix beginning with a consonant.

Thus दरिद्रितः, दरिद्रिथः, दरिद्रिवः, दरिद्रिमः ॥ But दरिद्रति before a vowel affix (VI. 4. 112) and दरिद्राति before a non-ङित् affix.

In forming the plural, the आ is elided before the affix अति (VII. 1. 4. S. 2479), by the following sûtra:—

२४८३ । श्नाभ्यस्तयोरातः । ६ । ४ । ११२ ।

अभ्यस्तयोरातो लोपः स्यात्क्ङिति सार्वधातुके । दरिद्रति । अनेकाच्त्वादाम् । दरिद्रांचकार । 'आत औ णलः' (२३७१) इत्यत्र 'ओ' इत्येव सिद्धे औकारविधानं दरिद्रातेरालोपे कृते श्रवणार्थम् । अत एव ज्ञापकाण्णलेत्येके । ददरिद्रौ । ददरिद्रतुरित्यादि । यत्तु णलि ददरिद्रेति तदप्रमाणमेव । * दरिद्रातेरार्धधातुके विवक्षित आलोपो वाच्यः * । * लुङि वा * । * सनि ण्वुलि ल्युटि च न * । दरिद्रिता । अदरिद्रात् । अदरिद्रिताम् । अदरिद्रुः । दरिद्रियात्-दरिद्र्यात् । अदरिद्रीत् । इट्सकौ । अदरिद्रासीत् ।

2483.* Before a Sârvadhâtuka कित् or ङित् affix beginning with a vowel, the long आ of श्ना (the vikaraṇa of the 9th class) and of the reduplicate stems is elided.

Note:—Thus लुनते, लुनताम्, अलुनत, मिमते, मिमताम्, अमिमत, संजिहते, संजिहताम् and समजिहत ॥ Why do we say 'of श्ना and the reduplicates?' Observe यान्ति वान्ति ॥ Why 'of long आ?' Observe बिभ्रति ॥ Why 'before कित् and ङित्?' Observe, अलुनात्, अजहात् ॥

Thus दरिद्रा+झि=दरिद्रा+अति (VII. 1. 4. S. 2479)=दरिद्रति (VI. 4. 112. S. 2486).

As the root is polysyllabic, its Perfect is formed periphrastically by आम् by the vârtika under III. 1. 35. S. 2306. Thus दरिद्रांचकार । Some say the Perfect is formed regularly, because of the implication of the sûtra आत औ णलः (VII. 1. 34. S. 2371). There the sûtra teaches the substitution of औ for णल्, while the same form like पपौ, ददौ &c. could have been evolved by the substitution of ओ for णल् । The fact that औ is taught there and not ओ indicates that औ is to be heard even in the root daridrâ when the final आ is elided. They form the Perfect as ददरिद्रौ । Dual ददरिद्रतुः &c. But the form ददरिद्र in णल् is wrong and without authority.

Vârt.—The final of दरिद्रा is elided before an Árdhadhâtuka affix. And this elision should be considered as siddha, in applying rules relating to affixes. Thus दरिद्रा by loosing आ becomes दरिद्र्, and we should apply those affixes which would come after a form like 'daridr', and not what would have come after a form like 'daridrâ.' Thus ण comes after roots ending in long आ (III. 1. 141): but this affix would not be applied here, but the general affix अच् (III. 1. 134). Thus दरिद्राति=दरिद्रः

Vârt.—Optionally so in the Aorist (adyatana-past) as अदरिद्रीत् or अदरिद्रासीत् ॥ The latter form is evolved by adding सक् of VII. 2. 73. S. 2377 and elision of सिच् ॥ The form दरिद्रस्य in the sûtra is Vedic, the root being shortened from दरिद्रा to दरिद्र ॥

Vârt.—The elision does not take place in the forms दरिद्रायक and दरिद्राण, and the Desiderative may be either दिदरिद्रासति or दिदरिद्रिषति ॥ To sum up "आ of दरिद्रा should be considered as elided when applying an ârdhadhâtuka affix, but optionally so before लुङ् (Aorist), and not at all before सन् (Desiderative), ण्वुल् and ल्युट्" ॥

Therefore the first Future is दरिद्रा+इट्+ता=दरिद्र्+इ+ता (*vârtika*)=दरिद्रिता The Imperfect is अदरिद्रात्, D. अदरिद्रिताम्, pl. अदरिद्रुः ।

दरिद्रा ६४ दुर्गतौ ।

64. daridrâ to be poor.

Pre. दरिद्राति । दरिद्रितः । दरिद्रति । दरिद्रासि । दरिद्रिथः । दरिद्रिथ । दरिद्रामि दरिद्रिवः । Per. दरिद्राञ्चकार । I Fut. दरिद्रिता । II Fut. दरिद्रिष्यति । Imperative दरिद्रातु or दरिद्रितात् । दरिद्रितां । दरिद्रिहि । दरिद्राणि । Imper. अदरिद्रात् । अदरिद्रिताम् । अदरिद्रुः । अदरिद्राः । अदरिद्राम् । Poten. दरिद्रियात् । दरिद्रियाताम् । Bene. दरिद्रियात् or दरिद्र्यात् । दरिद्र्यास्ताम् । Aorist अदरिद्रीत् or अदरिद्रासीत् । अदरिद्रिष्टाम् । अदरिद्रिषुः । अदरिद्रीः । अदरिद्रिषम् । Condi. अदरिद्रिष्यत् । Pass. दरिद्र्यते । Aor. अदरिद्रि । or अदरिद्रायि । Both with चिण् । Caus. दरिद्रयति । Deside. दिदरिद्रासति, दिदरिद्रिषति । Inten. दिदरिद्रायते । Nouns:—दर्द्रु । दरिद्रुः । दर्द्रुषः । दरिद्राणः । दरिद्रायकः । Past Part. दरिद्रितः । Act. दरिद्रितवान् ।

'चकासृ ६५ दीप्तौ' । अस्य अत् । चकासति । चकासां चकार । 'धि च' (२२४९) इति सलोपः । सिप एवेत्येके । चकाद्धि । 'चकाधि' इत्येव भाष्यम् ।

65. chakâ ṛi to shine. In the 3rd Person plural, the झ is replaced by अत् by VII. I. 4. S. 2479. as चकासति । The Perfect is चकासां चकार । In the 2nd Person Singular of the Imperative, the स् of चकास् is elided by VIII. 2. 25. S. 2249. As चकाधि । Others say that the स of सिप् only is elided by that sûtra, and they give the form as चकाद्धि . where स् is changed to द । But in the Mahâbhâshya the form given is चकाधि । In the Imperfect 3rd Singular, the स् becomes द by the following sûtra.

२४८४ । तिप्यनस्तेः । ८ । २ । ७३ ।

पदान्तस्य धातोः सस्य दः स्यात्तिपि न त्वस्तेः । अचकात्-अचकाद् । अचकासुः ।

2484. द is substituted for the final स् of a root, with the exception of अस्, before the Personal ending ति (त्), when it stands at the end of a word.

Note:—The स् of a root can stand at the end of a word when the Personal-ending is dropped. Thus अचकाद् भवान्, अन्वशाद् भवान्, from the roots चकास् and शास् ॥ The Personal affix is elided by VI. 1. 68, and thereby स् comes to stand at the end of a Pada.

Note:—Why do we say 'before तिप्'? Observe चकास् formed by क्विप् affix added to the root.

Note:—Why do we say 'with the exception of अस्'? See आप एवेदं सलिलं सर्वम् आः ॥ Here आः is the Imperfect 3rd Person singular of अस् ॥ The ईट् is not added as a Vedic irregularity. See VII. 3. 93, 97.

This sûtra is an exception to ससजुषोः (VIII. 2. 66. S. 162). Thus we have अचकाद् or अचकात् । The Plural is अचकासुः by जुस् (S. 2226). In the 2nd Person singular, the स् is either changed to द or रु by the following:—

२४८५ सिपि धातो रुर्वा । ८ । २ । ७४ ॥

पदान्तस्य धातोः सस्य रुः स्याद्वा । पक्षे [जश्त्वेन] दः । अचकाः-अचकात् ।

2585. रु or द may optionally be substituted for the स् of a root, before the Personal ending सि (स्), when such स् stands at the end of a Pada.

Thus अचकास् त्वम् or अचकात् त्वम्, अन्वशास् त्वम् or अन्वशात् त्वम् ॥ For the स is first substituted visarjaniya, which is then changed to स् ॥

The word धातोः is employed in the sûtra for the sake of the subsequent sûtras: so also the word रु ॥

√चकासृ ६५ दीप्तौ ।

65 √chakâsṛi to shine.

Pre. चकास्ति । चकास्तः । चकासति । चकास्सि । चकास्मि । चकास्वः । Per. चकासाञ्चकार । I Fut. चकासिता । II Fut. चकासिष्यति । Imperative चकास्तु । चकास्ताम् । चकासतु । चकाधि । Imper. अचकात् । अचकास्ताम् । अचकासुः । अचकात् or अचकाः । अचकास्तं । अचकास्त । अचकासम् । अचकास्व । अचकास्म । Poten. चकास्यात् । चकास्यातां । Bene. चकास्यात् । चकास्यास्ताम् । Aorist अचकासीत् । अचकासिष्टाम् । अचकासीः । अचकासिषम् । Condi. अचकासिष्यत् । Des. चिचकासिषति । Caus. चकासयति । Aorist अचीचकासत् ।

'शासु ६६ अनुशिष्टौ' । शास्ति ।

66 √Śasu to teach.

The Present 3rd Person Singular is शास्ति । In forming the Dual, the आ is replaced by इ by the following sûtra.

२४८६ शास इदङ्हलोः ॥ ६ । ४ । ३४ ॥

शास उपधाया इत्स्यादङि हलादौ क्ङिति च । 'शासिवसि-' (सू २४१०) इति षः । शिष्टः । शासति । शशास । शशासतुः । शास्तु । शिष्टात् । शिष्टाम् । शासतु ।

2486. Before the Aorist in अङ् and before an affix beginning with a consonant having an indicatory क् or ङ्, there is the substitution of इ for the vowel of शास् ॥

Thus शास+तस्=शिस्+तस्=शिष्+तस् (VIII. 3. 60. S. 2410) =शिष्टः । The 3rd Pl. is शासति ।

The Perfect is शशास, D. शशासतुः ।

The Imperative 3rd Singular is शास्तु or शिष्टात् D. शिष्टाम्, Pl. शासतु । In forming 2nd singular, the root शास् assumes the form शा by the following sûtra:

२४८७ शा हौ ॥ ६ । ४ । ३५ ॥

शास्तेः शादेशः स्याद्धौ परे । तस्याभीयत्वेनासिद्धत्वाद्धेर्धिः । शाधि । अशात् । अशिष्टाम् । अशासुः । अशात्-अशाः । शिष्यात् । 'सर्तिशास्ति-' (सू २३८२) इत्यङ् । अशिषत् । अशासिष्यत् ।

2487. Before the Imperative affix हि, शा is substituted for शास् ॥

Thus अनुशाधि, शाधि । The हि is changed to धि by VI. 4. 101. S. 2425, though strictly speaking that rule ought not to apply, as हि does not come after a झल् letter but after the vowel आ of शा । But the substitution of शा for शास् is by a rule of âbhiya section and is asiddha for the purposes of धि substitution. Thus we have शाधि । See VI 4. 22.

Note:—The anuvritti of उपधायाः is not here; so शा is substituted in the room of the full word शास् and not only for the penultimate vowel of शास् । The anuvritti of क्ङित् and ङित् also is not here. Therefore, when this हि is treated as पित् (III. 4. 88), then too the substitution takes place, though a पित् Sârvadhâtuka is not ङित् (1. 2. 4). Thus शाधि is also found in the Vedas as having acute on the first syllable, which can only be when धि is पित् and consequently anudâtta (III. 1. 4)

√शासु ६६ अनुशिष्टौ ।

66 √śasu to teach, instruct, train. This root takes two objects.

Pre. शास्ति । शिष्टः । शासति । शास्सि । शिष्ठः । शिष्ठ । शास्मि । शिष्वः । शिष्मः Per. शशास । शशासतुः । शशासिथ । शशास । शशासिम । I Fut. शासिता । II Fut. शासिष्यति । Imperative शास्तु or शिष्टात् । शिष्टां । शासतु । शाधि । शिष्टं । शिष्ट । शासानि । शासाव । Imper. अशात् । अशिष्टाम् । अशासुः । अशाः, । अशात् । अशिष्टम् । अशासम् । अशिष्व । अशिष्म । Poten. शिष्यात् । शिष्याताम् । Bene. शिष्यात् । शिष्यास्ताम् । Aorist अशिषत् । (by अङ् S. 2382). अशिषताम् । अशिषन् । अशिषः । अशिषतम् । अशिषत । अशिषम् । अशिषाव । अशिषाम । Con. अशासिष्यत् । Pass. शास्यते । Caus. शासयति । Aorist अशशासत् । Deside. शिशासिषति । Inten. शेशिष्यते । yaṅ luk शाशासीति or शाशास्ति । D. शाशिष्टः । Nouns:—शिष्यः । शास्त्रम् । आशीः । शासनं । Pre. Part. Parasmai. शासत् । Past Part. Pass. शिष्टः । Act. शिष्टवान् । Fut. Part. शासिष्यन् । Gerund शिष्ट्वा । शासित्वा । Infini. शासितुं । Adj. शासितव्यं । शासनीयं । शिष्यम् ।

दीधीङ् ६७ दीप्तिदेवनयोः । एतदादयः पञ्चधातवः छान्दसाः । दीधीते । एरनेकाच इति यण् । दीध्यते ।

67. didhiṅ to shine.

The five roots commencing with this are found employed in the Chhandas literature.

The Present 3rd Sg. is दीधीते । The dual is दीधी+आते = दीध्याते the ई is changed to य by VI. 4. 82. S. 272. The First Person Singular is दीधी+इट् । Now the following sûtra requires that the ई should be elided before the 1st Per Sg. affix.

२४८८ यीवर्णयोर्दीधीवेव्योः ॥ ७ । ४ । ५३ ॥

एतयोरन्त्यस्य लोपः स्याद्यकारे इवर्णे च परे । इति लोपं बाधित्वा नित्यत्वाट्टेरेत्वम् । दीध्ये । 'दीधीवेवीटाम्' (सू २१९०) इति गुणनिषेधः । दीध्यांचक्रे । दीधिता । दीधिष्यते ।

2488. The final of दीधी and वेवी falls before an affix beginning with य, व or ई ॥

Note:—Thus आदीध्य and आवेव्य गतः, आदीध्यते, and आवेव्यते before य ॥ आदीधिव, आवेविव; आदीधीत and आवेवीत ॥ Why before य, व or ई? Observe आदीध्यनम् and आवेव्यनम् ॥ The long ई in यी is a sûtra वैचित्र्य, for यिवर्णयोः would have been enough.

But this elision is prevented by the rule which requires the ए to be changed to ऐ (III. 4. 79. S. 2233). because it is a nitya rule. When ए is changed to ऐ there is no occasion for the application of this sûtra. Thus we have दीधी+ए=दीध्ये । The Per. is दीधी+आम्+चक्रे । The आम् does not cause the guna of the final ई because of the prohibition of I. 1. 6. S. 2190. Thus we have दीध्यांचक्रे ।

√दीधीङ् ६७ दीप्तिदेवनयोः ।

67 √dîdhîṅ 1. to shine. 2. to seem, appear.

Pre. दीधीते । दीध्याते । दीध्यते । दीधीषे । दीधीध्वे । दीध्ये । दीधीवहे । Per. दीध्यांचक्रे । I Fut. दीधिता । II Fut. दीधिष्यते । Imperative दीधीताम् । दीध्याताम् । दीधीष्व । दीध्यै । दीध्यावहै । Imper. अदीधीत । अदीध्याताम् । अदीधीथाः । अदीधि । (ई elided by S. 2488). Poten. दीधीत । दीधीयाताम् । Bene. दीधिषीष्ट । Aorist अदीधिष्ट । अदीधिषाताम् । अदीधिषि । Condi. अदीधिष्यत । Pass. दीधीयते । Caus. दीधयति । (दीधी+णिच्+शप्+तिप् No vriddhi by S. 2190 = दीध्+णिच्+शप्+तिप् S. 2488 = दीधि+शप्+तिप् = दीधे+अ+ति). Deside. दिदीधिषते । (ई elided by S. 2488). Inten. देदीध्यते । Nouns:—दीधितिः Pre. Part. Parasmai दीध्यत् । Past Part. Pass. दीधीतः । Act. दीधीतवान् । Fut. Part. दीधिष्यमाणः । Gerund दीधीत्वा । Infini. दीधितुम् । Adject. दीधीतव्यं । दीध्यनीयं । देधीयम् ।

वेवीङ् ६८ वेतिना तुल्ये ।

वीगतीत्यनेन तुल्येऽर्थे वर्तत इत्यर्थः ।

68 √vevîṅ 'to obtain' 'to conceive,' 'to pervade,' 'to cast,' 'to eat,' 'to wish,' 'to shine.' It has the same meaning as the root वी 'to go.' (II 39) It is conjugated like दीधी ।

Pre. वेवीते । Per. वेव्यांचक्रे । I Fut. वेविता । II Fut. वेविष्यते । (S. 2488) Imperative वेवीताम् । Imper. अवेवीत । Poten. वेवीत । Bene. वेविषीष्ट । Aorist अवेविष्ट । Condi. अवेविष्यत । Pass. वेवीयते । Caus. वेवयति । Deside. विवेविषते । Inten. वेवेवीयते । Pre. Atmane. Par. वेव्यानः । Past. Part. Pass. वेवीतः Act. वेवीतवान् । Fut. Part. वेविष्यमाणः Gerund वेवीत्वा । Infini. वेवितुम् । Adject. वेवीतव्यं । वेव्यनीयं । वेवेयम् ।

Here end the roots beginning with अद ।

अथ षषः परस्मैपदिनः । 'षस ६९ षस्ति ७० स्वप्ने' । सस्ति । सस्तः । ससन्ति । ससास । सेसतुः । सस्तु । सधि । 'पूर्वत्रासिद्धम्' (सू १२) इति सलोपस्यासिद्धत्वात् 'अतो हेः' (सू २२०४) इति न लुक् । असत् । असस्ताम् । असुः । ससत् । सस्यात् । असासीत्–अससीत् । सस्ति । सस्तिस्त्वादि [illegible] कृते संस्त्' इति स्थिते 'स्कोः–' (सू ३८०) इति सलोपे 'झरो झरि सवर्णे' (सू ७१) इति तकारस्य

वा लोपः । सन्तः । संसन्ति । बहूनां समवाये द्वयोः संयोगसंज्ञा नेत्याश्रित्य 'स्कोः-' (सू ३८०) इति लोपाभावात् । संस्ति । संस्तः । संस्तन्ति इत्येके ।

षस ६९ षस्ति च स्वप्ने ।

